ISSN- 2320- 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृतदर्शनविभागस्य peer-reviewed शोधपत्रिका)

## अष्टमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः
स्वामी जपसिद्धानन्दः

सम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit & Philosophy)
ISSN– 2320–5911

**सम्पादकः** - डॉ. राकेशदाशः
**सम्पादकमण्डली** - डॉ. वेङ्कटरमणभट्टः, डॉ. गोपीकृष्णन् रघुः, डॉ. नागराजभट्टः, डॉ. नीरजकुमारभार्गवः, स्वामी वेदार्थानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः

**Editor :** Dr. Rakesh Das
**Board of Editors :** Dr. Venkataramana Bhat, Dr. Gopikrishnan Reghu, Dr. Nagaraja Bhat, Dr. Neeraj Kumar Bhargave, Swami Vedarthananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat

**प्रकाशकः** - कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher :** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail : prajnaloka.rkmvu@gmail.com

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०२०
Year of Publishing– 2020

मूल्यम्– ₹ ७०/–
Price– ₹ 70/-

Powered by LaTeX 2ε

Printer : Rama Art Press, 6.30, Dum Dum Road, Kolkata 30

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | i |
| २. | Foreword<br>Swami Atmapriyananda | iii |
| ३. | ऋग्वैदिकसूर्यसूक्तानि तथा पौराणिकसूर्यदेवः :<br>“रूपद्वयं यथा भाति”<br>अभिषेक-घोषः | 1 |
| ४. | स्मृतिशास्त्रेषु गुणविवेचनम्<br>देवाञ्जनदासः | 16 |
| ५. | पदविमर्शः<br>पङ्कजराउलः | 22 |
| ६. | गीताञ्जल्यनुवादेषु विजयसारथिवैभवम्<br>डा. गोपीकृष्णन् रघुः | 34 |
| ७. | मम्मटनये दोषतत्त्वविमर्षः<br>भास्करः गङ्गोपाध्यायः | 42 |
| ८. | प्रत्नश्रुतिव्यवस्थावगमः<br>आवीरलालगङ्गोपाध्यायः | 53 |

# निवेदनम्

प्रज्ञालोकाख्याया विबुधमुदातानिकायाः पत्रिकाया इयं दशमी सञ्चिका। पूर्ववत् लेखानां चयने विशेषज्ञानां मतम् एव अङ्गीकृतम्। प्राबन्धिकानां परिचयम् अज्ञातवन्तः समीक्षकाः प्रबन्धानां समीक्षाम् अकुर्वन्। तेषां समीक्षकाणां कृते कार्तज्ञ्यं प्रकटयामः।

अस्मिन् अङ्के षट् प्रबन्धाः सन्ति। घोषोपाह्वेन अभिषेकवर्येण सूर्यदेवतायाः वेदेषु पुराणेषु उपपुराणेषु रूपवैचित्र्यं प्रतिपादितम्। सत्त्वरजस्तमसां गुणानां स्मृतौ कीदृशं स्थानम् इति विवेचितं दासोपाह्वेन देवाञ्जनमहोदयेन स्वीये प्रबन्धे। पदस्य वैविध्यं पदपदार्थयोः मिथःसम्बन्धः पदस्य शक्तिः इत्यादिषु विषयेषु शास्त्रीयाः अंशाः विचारिताः राउलोपाह्वेन पङ्कजमहाभागेन। रघूपाह्वेन गोपीकृष्णमहाशयेन गीताञ्जलेः रवीन्द्रनाथठाकुरस्य अमरकृतेः श्रीभाष्यं-विजयसारथिना कृतस्य अनुवादस्य सुष्ठु समीक्षा विहिता। गङ्गोपाध्यायोपाह्वेन भास्करेण मम्मटस्य मतानुसारं दोषाणां विमर्शः उपस्थापितः। गङ्गोपाध्यायोपाह्वः आवीरलालः प्राचीनसङ्गीतशास्त्रम् अनुसृत्य प्रतिश्रुतिव्यवस्था सचित्रं सोदाहरणं व्यवस्थापितम्।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयप्रतिकुलाधिपतिभ्यः, पूज्यकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA EDUCATIONAL AND RESEARCH INSTITUTE
(Formerly known and Ramakrishna Mission Vivekananda University)
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविराविर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being)! Reach me through and through! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace!

The present issue of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published after some delay. It was to have been published on the occasion of the University Foundation Day on 4 July 2020. This journal, as

mentioned in my Foreword to an earlier issue, is a reverential attempt to worship surabharati by our faculty of the Department of Sanskrit Studies. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of



| | |
|---|---|
| Belur Math | Swami Atmapriyananda |
| 4 July 2020 | Vice Chancellor |

# ऋग्वैदिकसूर्यसूक्तानि तथा पौराणिकसूर्यदेवः : "रूपद्वयं यथा भाति"

**अभिषेकघोषः***

ऋग्वैदिकसूक्तेषु सुर्यचर्चा न स्वल्पा परन्तु स्वातन्त्र्येण सूर्यसूक्ताणि नाधिकानि। प्राकृतिकशक्तिरूपेण सूर्यदेवस्य प्राधान्यं दृश्यते देवेषु सूर्यः नेति नाममात्रेण, भगमित्रादित्यादिभिः नामान्तरैः रूपान्तरैः वा जीवहितार्थम्। अस्मिन् निबन्धे ऋग्वैदिकसूर्यसूक्तानां ग्रहणेन तेषां चारित्र्यं स्वातन्त्र्यं च यथा प्रतीयते तदेव वक्तव्यम्।

ऋग्वैदिकदेवकल्पनायां भित्तिरूपस्य सूर्यदेवस्य प्रभावः अग्नीन्द्रादिदेवानां चारित्र्येषु विद्यमानः इति दृढः। सर्वानुक्रमणिकारेणोच्यते- एकः एव महानात्मा वेदे स्तूयते, सः सूर्य इति व्याचक्षते। अग्निः सर्वा देवताः इत्यग्नेः सर्वदेवात्मकत्वं सूचयति। अग्निसूक्तानां प्राचुर्यात् तदपरिहार्यत्वं नक्तन्दिवं च अनायासलभ्यत्वं प्रतीयते। दूरवर्ती सूर्यदेवः स्वप्रभावेण अद्वितीयः।

ऋङ्मन्त्रेषु स्तुतानि सर्वाणि देवरूपाणि। देवत्रयेषु 'सूर्यः द्युस्थानः' इत्युच्यते यास्काचार्येण। देवो दानाद्वा दीपनाद्वा द्योतमद्वा द्युस्थानो भवतीति वा इत्यनेन दीप्तिमत्वात् द्युस्थानत्वात् च सूर्यः देवप्रतिपादकः।

ऋग्वेदसंहितायां प्रथममण्डले दशममण्डले च सूर्यसुक्तैः सूर्यनाम्ना देवः सूक्तषट्केन स्तूयते। अत्र स्तोतृमण्डलानां मानसिकी याच्ञा यथा प्रतीयते तथैव आध्यात्मिकचिन्तनञ्च उपलभ्यते। तमोपहारकस्य सूर्यदेवस्य गगनमार्गेण अस्ताचलगमनेन निर्मलः जीवत्कालः द्योत्यते। कल्याणरूपात् तस्मात् आयुरारोग्यादयः यथा काम्याः तथैव, भास्वरस्य तस्य गमनेन दीप्तः क्रान्तदर्शी ऋषिः जागतिकयाच्ञामतिक्रम्य शाश्वतसत्यं प्राप्नोति। दिवाभागः इव सत्यवाङ्मयं जीवनं तदभीष्टमिति भाति।

स्वतन्त्र्यायां पौराणिकचर्चायां ऋग्वैदिकदेवकल्पना कदापि विवर्तिता कालानुसारिणी च। ऋग्वैदिकचर्चा प्राधान्येनार्यसभ्यता सम्भूता। पौराणिकी संस्कृतिः मिश्रा खलु। पौराणिकधर्मः स्मृतिमूलकः। स्मृतिशास्त्रं पुनः श्रुतिसम्मतम्- स्मर्यते वेदार्थः अनयेति। पौराणिकधर्मस्ततः वेदानुसारी तत्कालानुसारी खलु। पौराणिकचर्चायामपि स्तोत्रा मानसिकयाच्ञा ज्ञापिता। विवर्तितया चर्चयानया स्तोतृणां आकाङ्क्षाः सार्थकाः इति प्रदर्शिताः। परिवर्तितञ्च सूर्यस्वरूपम्। ऋषिः ऋचा दिदृक्षुः ज्योतिरुत्तमम्। अत उच्यते 'सुसन्दृशं त्वा वयं

---

* सहाध्यापकः, संस्कृतविभागः, वागनान कलेज

प्रति पश्येम सूर्य। वि पश्येम् नृचक्षसः।' पुराणेषु तस्यैव तेजोमयस्य सौम्यरूपं प्रार्थ्यते।

मार्कण्डेयपुराणमवलम्ब्य सूर्यस्तवैः आख्यानेनैकेन प्रतीयते सूर्यदेवः। ऋक्षु तेषां यथा प्रकाशः, पौराणिकी चर्चा तस्मादभिन्ना नैव। स्तोतृभिः पुत्रस्वामिपितृरूपैः मानवगुणान्वितः असौ, याचकानां आकाङ्क्षाश्च चरितार्थाः इत्यनेन ऋग्वैदिकपौराणिकयोः सूर्ययोः भेदः ज्ञापितः।

सिसृक्षुः ब्रह्मा सृष्टये तेजोनियमनार्थम् अमितद्युतये सूर्याय स्वाभीष्टं ज्ञापयति, ब्रह्मस्तवेन आराध्या तेषां सृजनीशक्तिः। अदितिस्तवेनासौ कल्याणमयः रक्षकः। विश्वकर्मणा संज्ञया च तेषां सौम्यं स्वामिरूपं काङ्क्ष्यते। सर्वत्रैव याच्ञा फलवती। अत्रैव पौराणिकनवप्रकाशः। राज्ञः राज्यवरधनस्य आख्यानेन सर्वेषां मानवानां कल्याणं ज्ञापितं राजमाहात्म्यञ्च प्रतीतम्। अतः मार्कण्डेयपुराणान्तर्भाविनी सूर्यचर्चा स्तोतॄणां याच्ञाः मनोभावान् च ज्ञापयति यदेव ऋग्वैदिकचिन्तनात् स्वातन्त्रेण वर्तमाना। एकस्यैव हितकारिणः कल्याणरुपिणः कालानुसारि रूपद्वयं प्रतीयते। याचकदिशा सूर्यस्य रूपभेदस्तत्र वाह्यिकः केवलमित्यलम्।

ऋग्वैदिकसूर्यसूक्तान्यवलम्ब्य मानवानामाकाङ्क्षाः यथा ज्ञापितास्ता ऋषिभिरभीड्डाः खलु। ऋषिस्तु सत्यवाक्।[१] अत उच्यते 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते।'[२] 'ऋषयो मन्त्रद्रष्टारः।'[३] अतस्तत्र मन्त्राः मननसम्भूताः। तत्र जागतिकी याच्ञा नाधिक्षिप्ता। पुनस्तेषु मानविकः वोधः नाच्छन्नः। मर्त्यजीवानां याच्ञा खलु ऋषिचित्तं यथोद्वेलयति तथैव जगतः रूपवैचित्र्यं रूपवैविध्यञ्च। चिन्तनोद्भूतैः सूक्तैः तावत् कल्याणान्वितं सौन्दर्यमन्विष्टम्। एषणैषा ज्योतिषा स्वाभीष्टं मार्गमन्विष्यमाणा। यतः आलोकाभावात् तमः सञ्जायते, तमोऽपहारकैः आलोकैः पथः प्रकाशः भाव्य इति। अतः सूर्यसूक्तैरेव तन्मार्गान्वेषणमादौ कार्यम्।

कः सूर्यदेवः? सुवीर्यः असौ। 'तं देवा अब्रुवन् स्वीर्यो मर्या यथा गोपायत् इति तत्सूर्यस्य सूर्यत्वम्'[४] इत्युच्यते। अपि च 'यः आदित्यः स्वर एव सः।'[५] मूर्तदेवोऽसौ प्रत्यक्षदृष्टः खलु। 'देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा'[६] इति निरुक्तम्। देवार्थकैः धातुभिः दीप्तिमत्वम्, द्युस्थानत्वं वेति

---

१ तथ्यसूत्राणि- ऋषयः सत्यवचसः। अमरार्थचन्द्रिका। ब्रह्मवर्गः। पर्यायः ११०, पृष्ठम् २२२

२ उत्तररामचरितम् १.१०

३ ऋष्यन्धकवृष्णिकुरुभ्यश्च (अष्टाध्यायी ४.१.११४)

४ तैत्तिरीयब्राह्मणम् २.२.१०

५ जैमिनीयोपनिषद्ब्राह्मणम् ३.३३

६ निरुक्तम् ७.१५.४ दिव्-अच् (नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः, अष्टाध्यायी. ३.१.१३४)

अन्यतमत्वेन प्रतीयते। अतः दीप्तिमत्वात् द्युस्थानत्वाच्चेति यदवस्थितिः प्रतीयते, सः भास्वरः दीप्तः सूर्य एव। सूर्यदेवस्य द्युस्थानत्वं प्रतीयते ऋङ्मन्त्रेणानेन 'सूर्यो नो दिवस्पातु, वातो अन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः।'[७] सूर्यः सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा इत्यनेन निर्वचनं कृतं यास्काचार्याचार्येण। प्रसवार्थस्य स एव हि इदं सर्वं प्रसूवति जनयतीति दुर्गाचार्याचार्येणोच्यते।[८] सायणाचार्येणोच्यते- 'उदयात् पूर्वभावी सवितोदयास्तमयवर्ती सूर्य इति।'[९] भगदेवस्याविर्भावादन्तरं सूर्योदयः। भगस्तु प्रातर्जित्।[१०] सूर्यागमनपूर्वभावी भगदेवः- 'तस्यकालः प्रागुत्सर्पणात्।'[११]

गभस्तिभिः पुष्टः सूर्यः पुषा इति परिगृह्यते। यास्काचार्येणोच्यते 'सर्वेषां भूतानां गोपयिता आदित्यः। अथ यद्रश्मिपोषं पुष्यति तत् पुषा भवति।'[१२] भगागमनकालादग्रसरः सूर्यः सृधातोः सूधातोर्वा निष्पन्न इति मतम्।[१३] 'सूर्यम्।' राजसूयसूर्य इत्यादिना 'षू प्रेरणे' इत्यस्मात् क्यपि रुडागमसहितौ निपातितः। अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्।[१४] इति सायणाचार्येणोक्तम्।

सूर्योदयानन्तरमायाति पूषा, असौ सूर्यं मार्गं प्रदर्शयति। अल्पतेजा सूर्य एव पूषेति गृह्यते इति सत्यव्रतसामश्रमिणा महाभागेन मन्यते। सूर्यार्थं उद्दीपनविधानं सवितृदेवेन क्रियते इति ओल्डेनवर्गमहोदयेनोच्यते।[१५] म्याक्डोनेल्महोदयेन उच्यते- 'we may therefore conclude that *Savitṛ* was originally an epithet of Indian origin applied to the sun as the great stimulator of life and motion in the world, representing the most important movement which dominates all others in the universe, but that as differenciated from *sūrya*, he is a more abstract deity. He is in the eyes of the Vedic poets the divine power of the sun personified, while *sūrya* is more concrete deity.'[१६] पुषा पुनः सूर्यस्य

---

[७] ऋग्वेदसंहिता १०.१५८.१

[८] वेदेर परिचय, सूर्य (परिशिष्ट. क) पृ. २२५

[९] सायणभाष्यम्, ऋग्वेदसंहिता ५.८१.४

[१०] 'प्रातर्जितं भगम् अमुम्', निरुक्तम् ७.४१.२

[११] तदेव १२.१३.७

[१२] तदेव १२.१६.७

[१३] 'यास्केर दृष्टिते वेदेर सौरदेवता', अन्वीक्षा, पृ. १९

[१४] सायणभाष्यम्, ऋग्वेदसंहिता १.५०.१

[१५] 'यास्केर दृष्टिते वेदेर सौरदेवता', अन्वीक्षा, पृ. १९

[१६] Vedic Mythology, p. 34

कल्याणमयी ऋद्धिदायिनी शक्तिः इति म्याक्डोनेलमहोदयेन ज्ञापितम्।[१७]

ऋग्वैदिकसूक्तेषु सूर्यचर्चा न स्वल्पा। परन्तु स्वातन्त्र्येण सूर्यसूक्तानि नाधिकानि।[१८] शक्तिरूपस्य ज्योतिष्मतः सूर्यदेवस्य प्राधान्यं दृश्यते देवेषु सूर्यः नेति नाममात्रेण; भगमित्रादित्यादिभिः नामान्तरैः रूपान्तरैर्वा[१९] जीवहितार्थम्। निबन्धेऽस्मिन् ऋग्वैदिकसूर्यसूक्तानां ग्रहणेन तच्चारित्र्यं स्वातन्त्र्यञ्च यथा प्रतीयते तदेव वक्तव्यम्।

ऋग्वैदिकदेवकल्पनासु सूर्यः मुख्यः अन्यतमः वेति ज्ञातम्। 'तिस्र एव देवता इति नैरुक्ताः। अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः सूर्योद्युस्थानः।'[२०] अग्नीन्द्रादिदेवानां चारित्र्येषु तत्प्रभावः विद्यमानः[२१] इति दृष्टः। सर्वानुक्रमणिकारेणोच्यते 'एकैव महानात्मा देवता तं सूर्य इत्याचक्षते। स हि सर्वभूतात्मा। तदुक्तमृषिणा- सूर्य आत्मा जगतस्तस्थूषश्च इति। तद्विभूतयोऽन्या देवताः।'[२२] अग्निः सर्वाः देवताः[२३]; 'अग्निर्वै सर्वा देवताः'[२४] इत्यग्नेः सर्वदेवात्मकत्वं सूचयति। अग्निसूक्तानां प्राचुर्यात् तदपरिहार्यत्वं नक्तन्दिवं च तदनायासलभ्यत्वं प्रतीयते। दूरवर्ती सूर्यदेवस्तु स्वप्रभावेणाद्वितीयः।

देवकल्पनासु सौरशक्तिः अन्यतमा इति ऋग्भिः प्रतिपाद्यते। परन्तु स्वातन्त्र्येण सूर्यायोत्सर्गीकृतानि सूक्तानि स्वल्पानि। प्रथमे मण्डले दशमे च[२५] ऋग्वेदसंहितायां सूर्यनामा देवोऽसौ[२६] सूक्तषट्केन स्तूयते। तत्र

---

१७ 'Thus the conception which seems to underlie the character of *pūsan*, Is the beneficent power of the sun, manifested chiefly as a pastoral deity' Vedic Mythology, page 37.

१८ ऋग्वेदसंहिता- १.५०, १.११५, १०.३७, १०.१५८, १०.१७०, १०.१८९

१९ 'तासां महाभाग्यादेकैकस्या अपि वहूनि नामधेयानि भवन्ति' निरुक्तम्- दैवतकाण्डे ७.२.१

२० तदेव

२१ मूर्धा भुवो भवति नक्तमग्निस्ततः। सूर्यो जायते प्रातरुद्यन्॥ (ऋग्वेदसंहिता- १०.८८.६)
स सूर्यः पत्यब्ध वरांस्येन्द्रो ववृत्याद्रथ्येव चक्रा। अतिष्टं तमपस्यं न सर्गं कृष्णा तमांसि त्विष्या जघान॥ (शुक्लयजुर्वेदसंहिता १०.८९.२)

२२ सर्वानुक्रमणि २.१४.२०

२३ ऐतरेयब्राह्मणम् २.३, तैत्तीरीयब्राह्मणम् १.४.४.१०

२४ ऐतरेयब्राह्मणम् १.१

२५ उत्तरकालीनं मण्डलद्वयमिति मतम्।
'Mandalas I and X, they call to be latter additions and to which they have not given so much attaintion and importance as they have given to the other mandalas.' A Critical Study of Rigveda, Introduction.

२६ सूर्यः यथा आसु ऋक्षु सूरः इति सर्वप्रेरकत्वात् सूच्यते( सायणभाष्यम्, ऋग्वेदसंहिता१.५०), तथैव पतङ्गः पतति गच्छतीत्यनेन सूचितः (सायणभाष्यम्, ऋग्वेदसंहिता१०.१८९.३)

प्राधान्येनोपलब्धं सूर्यस्य नैसर्गिकं रूपं यदेव ऋषिभिः दृष्टम्। सूक्तेषु एतेषु कुत्सप्रस्कण्वाभितपश्चक्षवः ऋषयः। सूर्यात्मवती सार्पराज्ञी पुनः मन्त्रद्रष्टृत्वेनोच्यते। प्रस्कण्वस्तु काण्वः इति ज्ञायते। कण्व इति पदं गभस्तिमता सूर्येणान्वितमित्युल्लेख्यम्।[२७] स्तोतृभिः स्वचित्तोद्गतैर्भावैः भवेत् तद्रूपं कल्पनान्वितम्। अतः सूर्यस्यानुपमं रूपं यथा मन्त्रद्रष्ट्रा दृष्टम् तथैव तच्चारित्र्यमुद्घाट्यते। चारित्र्यस्यास्य वैचित्र्यं विवर्तनञ्च ऋग्भिः पुराणदिशा च सूचनीयं निर्धार्यमानञ्चेति वक्तव्यम्।

सूर्यस्य नैसर्गिकरूपाणि नित्यमेव प्रत्यक्षतयास्माभिः दृश्यन्ते। अवसितायां रजन्यां सूर्योदयः कस्यचित् ज्योतिष्मतः आविर्भावः। जगतां प्रकाशकेनानेन तमसि वर्तमानानि नक्षत्राणि तमोऽपहारकस्याविर्भावात् नैव स्थीयन्ते-

अपत्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे।

(ऋग्वेदसंहिता १.५०.२)

पृथ्वी गभस्तिभिः पूर्णा जायते। द्यामन्तरीक्षमपि स्वालोकैः सूर्यः आवृणोति।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थूषश्च॥

(ऋग्वेदसंहिता १.११५.१)

आलोकागमैर्मानवाः स्वकर्मसु निरताः जायन्ते। अतः चराचरात्मके जगति पालनप्रकाशादीनां कल्याणकर्मणां सूचनम्। गगनमार्गमेवावलम्ब्य पूर्वभागतः नित्यमेव पश्चिमगामिनः सूर्यस्यैषा यात्रा दिवाभागस्यान्तं सूचयति।

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तो विततं सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥

(ऋग्वेदसंहिता १.११५.४)

कर्मसु व्यापृते जगति सहसैव विरामः जायते, सञ्जायते च तमोमयी रात्रिः, पुनश्चापि ज्योतिष्मता प्रणोदितस्य दिवाभागस्य प्राप्तये। जागतिकी क्रियैषा चिरन्तनी खलु।

जीवानां पुष्टिविधानेन[२८] सूर्यः पालकः[२९] पोषकश्च।[३०] न केवलमाहार्यैः रक्षणं, दिवा गृहस्थानां पान्थजनानां कल्याणं साधयत्यसौ।[३१] कल्याणकर्मभ्यः

---

२७ '...*kaṇva* (from *Kaṇ*, to close the eye) means rays of the Sun (which cause eyes to close with their glare).' A Critical Study of Rigveda, Introduction, page 6.

२८ येना पावकः चक्षसा भुरण्यन्तं जनाँ अनु।... (ऋग्वेदसंहिता १.५०.६)

२९ स सूर्यः प्रजाः पुपोष वृष्ट्यादिप्रदानेन पोषयति... सायणभाष्यम्, (ऋग्वेदसंहिता १०.१७०.१)

३० ...वातजूतो यो अभिरक्षति त्वना प्रजाः पुपोष पुरोधा वि राजति। (ऋग्वेदसंहिता १०.१७०.१)

३१ शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन.यथा शमध्वञ्छमसद्दुरोणे तत्

सहायभूतः तदालोकः।[३२] दिवा पाति जगन्तमसौ। न केवलं प्राकृतिकशक्तित्वेन, अपि च स्थावरजङ्गमात्मकस्य जीवमात्रस्य जगत्प्रपञ्चस्य च प्रभवः कारणीभूतश्च सूर्यः। महती शक्तिरेषा सुचिरमेव प्रत्यक्षतया उपलब्धा। मानवहितकारिणे तस्यै मानवाः प्रणताः खलु। अत उक्तम्- 'अगन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति' (तैत्तिरीयसंहिता ५.१.८.६)[३३] 'रक्षकोऽसौ विरोधिणां हन्ता।'[३४] शत्रुगणेभ्यः यथासौ त्रायते तथैव रोगादिभ्यः दीप्तिमत्वात्।[३५] सायणाचार्योक्तया दिशा उपस्थापनीयमेतत्- '...तथा च अनुक्रमण्यामुक्तम्- अन्त्यस्तृचो रोगघ्न उपनिषत् इति। युक्तम् चैतत्। यस्मादनेन तृचेन त्वग्दोषशान्तये प्रस्कण्व सूर्यमस्तौत् तेन तृचेन स्तुतः सूर्यस्तमृषिं रोगान्निरमयत् तस्मादिदानीमपि रोगशान्तये अनेन तृचेन सूर्य उपासनीयः। तदुक्तं शौणकेन- 'उद्यन्नद्योति मन्त्रोऽयं सौरः पापप्रणाशनः। रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रदः'[३६] अतः दायकत्वेन त्रायकपालकपोषकत्वाच्च तत्रभवतः सूर्यदेवस्य गुणवाहुल्यं सूच्यते। इत्थं सदैवासौ प्रत्यक्षतया कल्याणरूपी खलु।

सूर्यदेवस्य कल्याणरूपाणि प्रत्यक्षतया यथोपलभ्यते तथैव जगतः नियन्तृत्वेन तदुद्दीपनात् दीप्यमानं तन्माहात्म्यमनुभूयते ऋग्भिः।

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ (ऋग्वेदसंहिता १.५०.१०) इति।

अतः न खलु तदपरिहार्यत्वं नैसर्गिकशक्तित्वेन, अपि च, ज्योतिरुत्तमस्य उदयास्तगामिनस्तस्य नित्यं भास्वरं गमनमवलोक्य हृदि तन्निधाय च मानवैः स्वजीवत्कालान्तर्भूतं शाश्वतिकं गमनं निरूपणीयम्। अतः रथिनस्तस्य गगनमार्गे आगमनं प्रतिगमनं प्रत्यागमनञ्च असकृदेव वर्ण्यन्ते।[३७] तमोऽपहारकस्य सूर्यदेवस्य गगनमार्गेणास्ताचलगमनेन निर्मलः जीवत्कालः द्योत्यते। कल्याणरूपात्तस्मात् आयुरारोग्यादयः[३८] यथा काम्यास्तथैव भास्वरस्यास्य

सूर्य द्रविणं धेहि चित्रम्॥ तदेव, १०.३७.१०

[३२] यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम्॥ तदेव, १.११५.२

[३३] सायणभाष्यम्, ऋग्वेदसंहिता १.५०.१०

[३४] ऋग्वेदसंहिता, १०.१७०.२

[३५] उदान्नद्य मित्रमह आरोहन्नुत्तरां दिवम् .हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ (ऋग्वेदसंहिता १.५०.११)

[३६] सायणभाष्यम्, ऋग्वेदसंहिता १.५०.१०

[३७] सप्ता त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण॥ (ऋग्वेदसंहिता १.५०.८)
न ते अदेवः प्रदिवौ नि वासते यदेतशेभिः पितरैः रथर्यसि।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य॥ (ऋग्वेदसंहिता १०.३७.३)
...यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥ (ऋग्वेदसंहिता १.११५.४)

[३८] उदगादयमादित्यो विश्वेन सहसा सह।

गमनेन दीप्तः क्रान्तदर्शी ऋषिः जागतिकयाच्ञामतिक्रम्य शाश्वतिकं सत्यं प्राप्नोति।

सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च।
विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः॥
(ऋग्वेदसंहिता १०.३७.२) इति।

दिवाभाग इव सत्यवाङ्मयं जीवनं तदभीष्टमिति भाति। सूर्यदेवस्यास्य दीप्तिः सत्यवाङ्मयी सूर्योदयश्चापि सत्यवाक्याश्रितः। सद्वाङ्मयञ्चापि दिवा सूर्यं प्रकाशयति। सूर्यपिता द्यौश्चापि तदेव सत्यवाक्यमाश्रित्य वर्तमानः। सत्यवाङ्मयी पुनः प्राणिनां स्थितिः। सद्वचनैरेव रक्षितं सर्वं खलु।[३९] अतः दायकत्रायकरक्षकरूपः सूर्यः कल्याणरूपैः सर्वतत्त्वप्रकाशकः सञ्जायते।

'सुसन्दृशं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः॥'
(ऋग्वेदसंहिता १०.१५८.५)

सर्वप्रकाशकार्थमतः उन्मेषकस्य सूर्यस्य दातृरूपस्य वैविध्यं विशेषतया प्रतीयते। ऋग्भिः क्रान्तदर्शी ऋषिः सूर्यस्वरूपं दिदृक्षते, सूर्यैः प्रकाशितव्यानि सर्वाणि द्रष्टुकामोऽसौ तेषां स्वरूपमेव विज्ञातुं जिज्ञासते।

'चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः। सं चेदं वि च पश्येम॥'
(ऋग्वेदसंहिता १०.१५८.४)

अतः उच्यते सायणाचार्येण- 'चक्षुसंज्ञकाय नो मह्यं चक्षुरिन्द्रियं वा तेजो वा हे सूर्य धेहि प्रयच्छ। तनूभ्यः अस्माकं शरीरेभ्यस्तनयेभ्यो वा विख्यै विख्यानाय प्रकाशनाय चक्षुः त्वदीयं प्रकाशं विधेहि। यत एवं तस्मात् कारणात् त्वदीयेन तेजसा वयं च इदं सर्वं जगत् सं पश्येम। सम्यग् द्रष्टरो भवेम।...तथा नृचक्षसः नृभिर्मनुष्यैरस्माभिर्द्रष्टव्यान् पदार्थान् वि पश्येम विद्रष्टरो भवेम।...'[४०] सूर्यरूपोत्कर्षदर्शनाय अयमभिलाषः पश्चात् पौराणिकस्य सौम्यरूपान्वितस्य सूर्यस्य मूलभावं ज्ञापयति। प्रत्यक्षदृष्टस्य सूर्यस्य उन्मोचकत्वात् उन्मेषकत्वाच्च विद्यमानौ वाह्यिकान्तरिकौ प्रभावौ। ऋषिभिरभीष्टं सूर्यस्वरूपान्वेषणमेतत् स्वाभीष्टनां याच्ञामतिक्रम्य तदन्वितामाध्यात्मिकीमाकाङ्क्षामपि प्रकाशयतीति प्रतीयते।

पुराणेष्वपि सूर्यरूपाणि नाच्छन्नानि। परन्तु, तत्र सूर्यचर्चासु कश्चित् भेदः

---

द्विषन्त मह्यं रन्धयन्मो अहं द्विषते रथम्॥ (ऋग्वेदसंहिता १.५०.१३)

३९ 'सा, सूर्यस्य तनुरित्यध्याहार्यम्, स्त्रीलिङ्गनिर्देशसामर्थ्यात्। मा माम् सत्योक्तिः उच्यन्ते देवतागुणाः अनया इत्युक्तिः स्तुतिः। सा सत्या अविसंवादिनी यस्याः सा सत्योक्तिः यथाभूतगुणग्राहिस्तुतिरित्यर्थः...' स्कन्दस्वाम्युद्गीथीयं भाष्यम्, ऋग्वेदसंहिता, १०.३७.२

४० सायणभाष्यम्, ऋग्वेदसंहिता १०.१५८.४,५

परिदृङ्कः। अत्रापि सूर्यरूपं मुख्येन प्रतीयते। पौराणिकः सूर्यः प्राधान्येन किरणमालीति भाति। मुख्यतया कथामेकामाश्रित्य पौराणिकः सूर्यः सात्मजः सानुचरः क्रमेण प्रवृद्धः। छायासंज्ञयोः वृत्तमाश्रित्यैषा कथा सुप्रसिद्धा पुराणेषु। अत्र पुराणकृद्भिः कल्पिता विवर्द्धिता च कथा मननोद्भूता यथायथम्। कल्पनस्य याथार्थ्येण शक्तिमत्ताच्च एषा कथा चिरन्तनी सञ्जाता।[४१] ऋग्भिः यथा ऋषिः स्तौति, स्तवैः पुनः पुराणेषु ज्योतिष्मतः सूर्यस्यैव स्तुतिः नामान्तरैः विधृता। सूतैः विवृतासु पुराणकथासु स्तोतृभिः स्वाभिप्रायः ज्ञाप्यते। स्तोतृरूपिणः यथा मानवाः तथैव देवाश्च तत्र।

मार्कण्डेयपुराणमाधारीकृत्य (४००-५०० इत्यस्मिन् ईशवीयाब्दे संकलितं पुराणमेतदीति मतं ज्ञापितम् अशोकचट्टोपाध्यायेन महाभागेन 'पुराण परिचय' इत्यस्मिन् ग्रन्थे, पृष्ठम् ६६) सूर्यस्वरूपस्यास्य विश्लेषणमत्र क्रियते। स्तोत्राभीड्ः स्तूत्यः सूर्यः अत्रोपस्थापितः। अतः याचकानां स्तूत्यस्य च सूर्यस्य चारित्र्येषु वैचित्र्यं वैविध्यं चात्र वैशिष्ट्यान्वितौ जातौ। स्तोतृस्तूत्ययोः रूपायणात् तदभीष्टकाङ्क्षा विचित्रतया प्रकाश्यते। ब्रह्मकृतः रविस्तवः अदितिकृता भास्करस्तुतिश्चात्र यथा प्राप्येते तथैव विश्वकर्मणा कृतं सूर्यस्तवनं वर्तते। विद्यते च राज्यवद्र्धनकृता सूर्यस्तुतिश्चापि।[४२]

स्वतन्त्रायां पौराणिकचर्चायां ऋग्वैदिकदेवकल्पना कथञ्चित् विवर्तिता कालानुसारिणी च। उच्यते चापि- 'पुराणं कस्मात्? पुरा नवं भवति।'[४३] ऋग्वैदिकी चर्चा प्राधान्येन आर्यसभ्यतासम्भूता। पौराणिकी संस्कृतिः मिश्रा खलु। पौराणिकधर्मः स्मृतिमूलकः। स्मृतिशास्त्र पुनः श्रुतिसम्मतम्- स्मर्य्यते वेदार्थः अनयेति।[४४] पौराणिकधर्मस्ततः वेदानुसारी तत्कालानुसारी खलु। उक्तञ्च 'इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्।' अपि च 'वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।'[४५] पौराणिकचर्चासु स्तोत्रा मानसिकी याच्ञा ज्ञाप्यते इति दृष्टम्। विवर्तितया चर्चयानया स्तोतृणां आकाङ्क्षाः सार्थकाः इति प्रदर्शिताः। ब्रह्मकृतं

---

[४१] 'पुराणसमूहे सुर्येर एकाधिक आख्यान-आख्यायिकार मध्ये प्रसिद्धतम सूर्य-संज्ञा-छाया संवाद। काहिनीर मध्ये पुराणकारदिगेर वरिष्ठ कल्पनाशक्ति, घनपिनद्ध चिन्ता ओ सुसंहत मनेर सुष्ठु क्रमपरिणति लक्ष्यणीय। अधिकांश पुराणे प्राय एकइ काहिनी। एखाने मार्कण्डेयपुराणेर काहिनी उपस्थापित हइल।' पुराण परिचय, पौराणिक देवता, पृष्ठम् १६८

[४२] मार्कण्डेयपुराणम्, ९५-१०० अध्यायाः

[४३] दुर्गाचार्यकृता टीका, निरुक्तम् ३.१९

[४४] इतिहास-पुराणाभ्यां वेदं समुपवृंहयेत्। बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥ (महाभारतम् १.१.२०४)

[४५] वेदार्थादधिकं मन्ये पुराणार्थं वरानने. वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः॥ (नारदीयपुराणम् २.२४.१७)

रविस्तवमत्र उल्लेख्यम्। पुनश्च अदितिकृता भास्करस्तुतिश्चापि प्रतिपाद्यते। सूर्यतेजोप्रावल्येण जीवानां नाशः भाव्यः, सृष्टये तेजोनियमनार्थमतः ब्रह्मणा स्वाभिलाषः ज्ञाप्यते। तथैव, दक्षात्मजा अदितिः हिताय देवानामात्मजानां तेजोमयं सूर्यं तुष्टव। अतः ब्रह्मस्तवैः-

इत्येवंसंस्तुतोभास्वान्ब्रम्हणासर्गकर्तृणा।
उपसंहृतवांस्तेजः परंस्वल्पमधारयत्॥ (मार्कण्डेयपुराणम् ९५.१३)

ततश्च-

देवासुरादीन्मर्त्यांश्चपश्वादीन्वृक्षवीरुधः।
ससर्जपूर्ववद्ब्रम्हानरकाँश्चमहामुने॥ (मार्कण्डेयपुराणम् ९५.१५)

जननी अदितिः पुनः दैत्यैः जितानां देवानां रक्षणार्थं सूर्यमस्तौत्। अतः तयोच्यते, 'किंस्तव्यंतवसकलात्मरूपधाम्नः'[४६] असौ एव तेजसामाधारभूतः। असौ रक्षकः नाशकश्चेत्यादौ दृश्यते। अतः'भक्तानुकम्पक विभो भक्ताहं पाहि मे सुतान्।'[४७] अत्रोभयविधा याच्ञा खलु प्रदर्शिता। तत्र आन्तरिकी अभीप्सा वर्तमाना, पुनश्चापि अभीङ्घैः ऐहिकी स्वार्थान्विता ईप्सा प्रकर्षेण विद्यमाना। अत्र सूर्यमाहात्म्यमन्विष्टम्; अपि च, त्रायकत्वेनासौ प्रभुरूपी। स्तोत्रानुभूतं तन्नियन्तृत्वं ऋग्भिः यथा प्रदश्र्यते, पुराणदिशा तदेव भिन्नत्वेन ज्ञापितम्। तन्नियन्तृत्वमत्र शासकत्वेन, त्रायकत्वञ्च स्वामिपुत्रादिभिः मानवत्वेन सूच्यते इति प्रतीयते।

परिवर्तितञ्चात्र सूर्यस्वरूपम्। ऋषिः ऋचा दिदृक्षुः 'ज्योतिरुत्तमम्।'[४८] अतोच्यते- 'सुसन्दृशं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः।'[४९] पुराणेषु तस्यैव तेजोमयस्य सौम्यरूपं प्रार्थ्यते।[५०] मार्कण्डेयपुराणान्तर्गतैः सूर्यस्तवैः आख्यानेनैकेन च प्रतीयते सूर्यदेवः। ऋक्षु तेषां यथा प्रकाशः, पौराणिकी चर्चा तस्मादभिन्ना नैव। स्तोतृभिः पुत्रस्वामिपितृरुपैः मानवगुणान्वितः असौ, याचकानां आकाङ्क्षाश्च चरितार्थाः इत्यनेन ऋग्वैदिकपौराणिकयोः सूर्ययोः याचकयोः च भेदः ज्ञापितः।

सिसृक्षुः ब्रह्मा सृष्टये तेजोनियमनार्थम् अमितद्युतये सूर्याय स्वाभीष्टं ज्ञापयति, ब्रह्मस्तवेनाराध्या तेषां सृजनीशक्तिः। अदितिस्तवेनासौ कल्याणमयः रक्षकः। विश्वकर्मणा संज्ञया च तेषां सौम्यं स्वामिरूपं काङ्ख्यते।

---

[४६] मार्कण्डेयपुराणम् ९६.३६

[४७] मार्कण्डेयपुराणम् ९६.३४

[४८] इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजदुच्यते वृहत्।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम्॥ (ऋग्वेदसंहिता १०.१७०.३)

[४९] ऋग्वेदसंहिता १०.१५८.५

[५०] 'संघातंतेजसांतद्वदिहपश्यामिभूतले...' (मार्कण्डेयपुराणम् ९६.३४)

तवातितेजसाव्याप्तमिदंरूपंसुदुःसहम्।
असहन्तीततःसंज्ञावनेचरतिवैतपः॥
द्रक्ष्यतेतांभवानद्यस्वभार्यांशुभचारिणीम्।
रूपार्थंभवतोऽरण्येचरन्तीसुमहत्तपः॥ (मार्कण्डेयपुराणम् ९८.३६,३७)

सर्वत्रैव याच्ञा फलवती। अत्रैव पौराणिकनवप्रकाशः। राज्ञः राज्यवद्र्धनस्याखानेन सर्वेषां मानवानां कल्याणं ज्ञापितं राजमाहात्म्यञ्च प्रतीतम्। मार्कण्डेयपुराणान्तर्भाविनी सूर्यचर्चा स्तोतृणां याच्ञाः स्वार्थान्विताञ्च मनोभावान् ज्ञापयति यदेव ऋग्वैदिकचिन्तनात् स्वातन्त्र्येण वर्तमाना। अपि च, मानवत्वात् सूर्यस्यैव दोषगुणान्वितत्वेन देवत्वे सत्यपि नरत्वं सूच्यते। नराणामिव तदभिलाषोऽपि यथा ज्ञापितस्थैव दायकोऽसौ। नियन्तृत्वेनापि तस्यैव क्षमता सीमायिता, देवत्वेनापि स्वामित्वेनापि अनेन छाया संज्ञात्वेन प्रतीयते। यः तेजोप्रावल्येन न लङ्घनीयः, स एव तेजोलाघवेनालमिति सूच्यते।

ऋग्भिः प्रतीयमानः सूर्यः यथा रोगादीनां मोचयिता तथैव सर्वप्रेरकः चिद्रूपः मुमुक्षवे, तमोपहः ज्योतिष्मानसौ। सायणभाष्यानुसारिणी व्याख्यात्रोपस्थापनीया-

'... हे सूर्य! अन्तर्यामितया सर्वस्य प्रेरकः परमात्मन् तरणिः संसाराब्धेस्तारकः असि। यस्मात् त्वं विश्वदर्शतः...सर्वैः मुमुक्षुभिः दर्शतः द्रष्टव्यः साक्षात्कर्तव्यः इत्यर्थः। अधिष्ठानसाक्षात्कारे ह्यारोपितम् निवर्तते। ज्योतिष्कृत् ज्योतिषः सूर्यादेः कर्ता। चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत (तैत्तिरीयारण्यकम् 3.12.6), ईदृशस्त्वं चिद्रूपतया विश्वं सर्वं दृश्यजातं रोचनं रोचमानं दीप्यमानं यथा भाति तथा आ भासि प्रकाशयसि। चैतन्यस्फूरणे हि सर्वं जगत् दृश्यते। तथा चाम्नायते तमेव भान्तमनुभाति सर्वम् तस्य भासा सर्वमिदं विभाति (कठोपनिषत् ५.१५)।'[५१]

सूर्यस्य रोगनाशकत्वं यथा ऋक्षु प्राप्यते तथैव उत्तरकालवर्तिषु पुराणादिषु शास्त्रेषु चापि। ऋग्वेदीया सायणभाष्यानुसारिणी व्याखात्रोपस्थापनीया- 'एवंविधस्त्वं मम हृद्रोगं हृदयगतमान्तरं रोगं हरिमाणं शरीरगतकान्तिहरणशीलं बाह्यं रोगम्। यद्वा, शरीरगतं हरिद्वर्णं रोगप्राप्तं वैवर्ण्यमित्यर्थः। तदुभयमपि नाशय। मां स्तोतारमुभयविधाद्रोगान्मोचयेत्यर्थम्।'[५२]

ऋक्षु सूर्यदेवस्य रूपान्तराणि नामान्तरेण सूच्यन्ते। पुराणैः विष्णुदेवः माहात्म्यान्वितः स्थितः।[५३] असौ सूर्यस्यैव पौराणिकप्रकाशः इति

---

[५१] सायणभाष्यम्, ऋग्वेदसंहिता, १.५०.४

[५२] सायणभाष्यम्, ऋग्वेदसंहिता, १.५०.११

[५३] 'The three Vedas g, *Yajus* and *Sāman* are portions of *Viṣṇu*. This power of *Viṣṇu* stayes in *Āditya* always. It stays not only in the sun, but also in the

दृश्यते। विष्णुत्वेन सूर्यत्वमत्र ज्ञाप्यते। मूर्तदेवस्य ज्योतिष्मतः सूर्यस्य प्रकाशस्तु तथापि पुराणेषु नाच्छन्नः जातः। नामान्तरैः पुनः पुराणानि मुख्यतया दिवाकरं सूर्यमेव ज्ञापयन्ति। अतः असौ सूर्यदेवः एकः एव हि आदित्यभास्करभानुस्वर्भानुविष्णुत्वेन सूच्यते इति मार्कण्डेयपुराणम्।[५४] तत्सर्वदेवमयत्वं सर्वात्मकत्वञ्च ज्ञाप्यते इतिहासाख्यैः महाभारतैः। तन्नामान्तराणि यथा ज्ञापितानि तत्र, तस्मात् नामवाहुल्येनापि तदभिन्नत्वं यथार्थतयानुभूयते।

सूर्योऽर्यमा भगस्त्वष्ट पूषार्कः सविता रविः।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः॥ (महाभारतम् ३.१६)

अदितिगर्भजः मार्तण्डः विश्वकर्मणः आत्मजया संज्ञया परिणीतः इति पुराणाश्रिता सूर्यकथा।[५५] ऋग्वैदिकसूर्यदेवस्तत्र नवरूपान्वितः इति दृष्टम्। अत्र सूर्यदेवस्यास्य मानवत्वं सूच्यते। तत्तेजोप्रावल्येणैव परिणयोत्तरं जीवनं छायाच्छन्नं जातम्। यत्तेजोमयत्वादेव तन्माहात्म्यं सूच्यते, तेनैव औज्ज्वल्येन तज्जीवनं क्लिष्टम्भवत्। सूर्यभार्या संज्ञा तद्गर्भजाश्च मनुयमयमुनाः। सूर्यस्य तेजोद्दीप्तं रूपं संज्ञायै न रोचते। स्वामिनः सौम्यकान्तिः एव तदभीष्टः। अतः संज्ञा पित्रालयं गता। मातृरूपेणापि विमाता छाया संज्ञात्मजान् न यतते। क्रोधाविद्धः यमः धृतिनाशात् छायया शप्तः बभूव। सूर्ये स्नेहप्रीतिक्रोधादीनां समावेशत्वात् नरत्वम्, तेजोमयत्वात् तेजोप्रावल्याच्च तदसहायत्वम् पुराणकृद्भिः प्रदर्शितम्। पुराणाश्रिता सूर्यकथात्र सामाजिकीकृता, नीतिवोधान्विता हिताहितगुणागुणाश्रिता। हिताय जनानां मानवकथा एवात्र प्रतीयते। अतः न प्रावल्यं, जीवहितार्थं कल्याणमयत्वमेवात्र प्राथ्र्यते। अतः तेजोनियमनेनैव तत् सिद्धमिति भाति।[५६] यौथजीवनमेव सामाजिकैः जनैः काम्यते, ततः पुराणैः एव सृजनोन्मुखः सौम्यः सूर्यः देवत्वेन काङ्ख्यते, तत्कल्याणरुपमेव प्रदर्शितञ्च।

---

three godheads *Brahmā*, *Viṣṇu* and *Śiva*. At the time of creation *Brahmā* was pervaded by g… Even though the sun is only one of the seven groups, he is above the others in prominence. The complete power of *Viṣṇu* is the three Vedas. g, *Yajus* and *Sāma*. The power in the form of the sun. That power destroyes all the sins in the world. *Viṣṇu* stays inside the sun in the form of of g, *Yajus* and *Sāma* for the sustenance and protection of the world.' *Purānic* Encyclopedia, page 770.

[५४] आदित्यंभास्करंभानुसवितारंदिवाकरम् . पूषाणमर्यमाणंचस्वर्भानुंदीप्तदीधितिम्॥ (मार्कण्डेयपुराणम्, १००(क).६४)

[५५] अथतस्मैददौकन्यांसंज्ञांनामविवस्वते .प्रसाद्यप्रणतोभूत्वाविश्वकर्मा प्रजापतिः॥ (मार्कण्डेयपुराणम् ९८.१)

[५६] विश्वकर्मात्वनुज्ञातः शाकद्वीपेविवस्वतः।
भ्रमिमारोप्यतत्तेजः शातनायोपचक्रमे॥ (मार्कण्डेयपुराणम् ९८.४०)

राज्ञः राज्यवर्धनस्य कथामाश्रित्यैव सूर्यमाहात्म्यं यथार्थमेव मानवकल्याणान्वितं जायते। प्रजावत्सलं राज्यवद्र्धनं तन्महिषीञ्च मानिनीमवलम्ब्य एषा कथा विवृता। राज्ञः शिरसि केशेषु शुभ्रत्वेन राज्ञी मनसा शङ्कान्विता। प्रभुत्वेनापि अपि मत्र्यजीवानामिव यथाकालमेव पञ्चत्वं गन्तव्यमिति राज्ञा अनुभूयते। मत्र्यत्वमेव विश्वस्य सर्गस्थितिलयानुसारि। अतः जगतः कल्याणं विहितम्। अतः वनवासः राज्ञा काम्यते। लोकानुरञ्जकत्वादेव राज्ञः दीर्घः परमायुः प्रजाभिः सूर्यतपसा प्राप्तः। हृष्टेषु सर्वेष्वपि राजा सुखी न बभूव। यतः स्वजनात् वियुक्तं तज्जीवनं न भवेत् सुखावहं न च प्रीतिप्रदम्। वियोगत्वात् स्वजनेभ्यः प्रजाभ्यश्च चिरायुः असौ भारान्वितं तज्जीवनं न याचते। सपत्नीकोऽसौ सुर्यतपा सञ्जातः। कृच्छ्रेण महता आशीः सूर्यस्य लेभे पुनः। सात्मीयः सानुचरः सात्मजाः असौ वृद्धायुः सञ्जातः। [५७]

भानुभक्तेरहोशक्तिर्यद्राजाराज्यवद्र्धनः।
आयुषोवद्र्धनेजातःस्वजनस्यतथात्मनः॥

(मार्कण्डेयपुराणम् १००(ख).३६)

राज्यवर्द्धनस्य आयुर्वर्द्धनात् सार्वत्रिकं कल्याणं न भाव्यम्। अतः प्रार्थना न काङ्क्ष्यते। सर्वतोमुखि कल्याणम् एवाभीष्टम् इति कथयानया ज्ञापितम्। प्रजाभिस्तत्र परमा राजभक्तिः प्रदर्शिता, राजमाहात्म्यञ्चात्र प्रतिष्ठितम्। राज्ञ्याः अभीष्टम् अपि स्वार्थान्वितम् इति भाति। [५८]

परन्तु, सर्वेषां कल्याणम् एव अभीष्टम् इत्ययं वोधः ज्ञाप्यते पुराणकृद्भिः। न स्वार्थान्वितं हितार्थम्, पारमार्थिकेन हितेनैव कल्याणं यथार्थमेव भाव्यमिति कथयानया मुख्यतया तदेव प्रकाश्यते। [५९] ऋग्भिः व्यक्तया याच्ञया सर्वेषां इष्टं

---

[५७] मार्कण्डेयपुराणम्, अध्यायाः१००(क,ख)

[५८] तच्छ्रुत्वा जहृषे तस्य सा पत्नी मानिनी द्विज। (प्रहर्षं परमं याता हर्षोद्गततनूरुहा)
स च राजा चिरं दध्यौ नाह किंचिच्च तं जनम्।
ततः सा मानिनी भूपं हर्षापूरितमानसा।
दिष्ट्याऽऽयुषा महीपाल वर्धस्वेत्याह तं पतिम्
तथा तया मुदा भर्ता मानिन्याथ सभाजितः।
नाह किंचिन् महीपालश्चिन्ताजडमना द्विज॥
(मार्कण्डेयपुराणम् १००(ख) ७,८,९)

[५९] "ऋषि ने इस मत का प्रतिपादन किया है कि स्वार्थ आसुरी वृत्ति है, परमार्थ दैवी गुण है। इस गुण के विकास के लिये सदैव प्रयत्नशील रहना चाहिए। इससे जो मानसिक शान्ति मिलती है, उसकी कल्पना नहीं की जा सकती। इस शान्ति को हीरे-पन्नों से नहीं खरीदा जा सकता, इसे तो अपनी भावनाओं को उदार बनाकर सारे ब्रह्माण्ड में बिखेर देने से आकर्षित किया जा सकता है। इस भावना की पुष्टि व संवर्धन के लिये विश्व कल्याण की प्रार्थना को बडे ढङ्ग से संजोया गया है 'सब प्राणी सुखी हों, अन्यो में स्नेह रखें, समस्त

याचते-

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः।
उद्यन्तं त्वा मित्रमहो दिवेदिवे ज्येग्जीवाः प्रति पश्येम सूर्य॥
(ऋग्वेदसंहिता, १०.३७.७)

सर्वजनहितान्विता एषा पुराणकथा ऋग्वैदिकचिन्तनेन उद्बुद्धा तदनुसारिणीति प्रतीयते। अतः ऋग्वैदिकपौराणिकयोः सूर्ययोर्भेदः खलु वाह्यिकः एव। तयोः विद्यमानं स्वातन्त्र्यं नान्तरिकमिति भाति। यतः, एकस्यैव हितकारिणः कल्याणरूपिणः कालानुसारि रूपद्वयमत्र प्रतीयते। याचकदिशा सूर्यस्य रूपभेदस्तत्र वाह्यिकत्वेनैव प्रतीयमानः इति।

ऋक्षु पुराणेषु च स्तोत्रा ऋषिणा दृश्यमानः सूर्यः सदैव चिद्रूपः। अतः तत्तेजोमयत्तं सार्वत्रिकम्। न कथमपि जडत्वेन पुनः तेजोमयत्वाच्च तत्प्राणवत्वं सर्वेषु प्राणिषु विद्यमानम्। अतः पुराणैः तस्य नरत्वं विहितम्। तस्यैव प्राणवतः बाह्यरूपाण्यतिक्रम्य सुचिरमेव मानवैः तद्रूपं जीवत्वं तस्मिन् सूर्ये अनुभूयते। [६०] अतः तदुद्दीपनं यतः प्रत्यक्ष्यदृष्टं ततः एव मनसा अनुभूयमानम्। शश्वदेव तद्वाह्यरूपं प्राप्यमानम्। देवत्वेनापि मानवत्वेनापि पुनः तद्भास्वरत्वमेव आत्मना मनसा च प्राप्तव्यम्, यतः न मालिन्यम्, निष्कलुषत्वादेव जीवानां कल्याणं यथार्थमेव भाव्यम्। कल्याणं शुभत्वज्ञापकम्। कल्यपदेन निरामयत्वमपि वोध्यम्। [६१] अतः ऋचा यदेव अभीष्टम्- [६२]

येन सूर्य ज्योतिषा वाधसे तमो जगच्च विश्वमुदियर्षि भानुना।

---

प्राणिओं का कल्याण हो ओर उन्हें किसी प्रकार का कष्ट न हो। जीवों को किसी प्रकार का शारीरिक व मानसिक रोग न हो, सब लोग सबके मित्र हों... तुम्हारी बुद्धि में सब प्राणियों के कल्याण की भावना हो। जिस प्रकार अपना ओर अपनी सन्तान का हित चाहते हो, उसी तरह सब प्राणियों के कल्याण की बात सोचो।...जा मुझसे प्रेम करता है, उसका सदैव हित साधन हो। मुझसे द्वेष करने वाले का भी सदैव कल्याण हो।' " 'मार्कण्डेय पुराण का नैतिक व सांस्कृतिक अध्ययनः परमार्थ तत्त्व का निरूपण' (मार्कण्डेयपुराणम्, पृष्ठम् ४८५)

[६०] 'अन्तश्चरति रोचनास्य प्राणादपानती।...' (ऋग्वेदसंहिता, १०.१८९.२)

[६१] बङ्गीय शब्दकोष, पृष्ठम् ५६८

[६२] "Besides this lower type or worship for a tangible goal, a higher note is struck in a hymn addressed to *Sūrya*. In a verse the worshipper prays to *Sūrya* to be free from feeble sacrifices which common people indulge in. He prays: 'O *Sūrya*, with the light whereby thou scatterest gloom, and with thy ray, impellest every moving thing; keep far us all feeble worthless sacrifice and drive away disease and every evil dream.' " Treatment of Nature in the gveda, p. 162

तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुःष्वप्न्यं सुव॥

(ऋग्वेदसंहिता १०.३७.४)

एवम्विधं रूपमेव यथा ऋषिणोभीष्टं तथैव पुराणकृद्भिः मनस्विभिः। तादृशं कल्याणरूपमेव कालेषु क्रान्तदर्शिभिः कविभिः अभीष्टम्-

‘कलुष कल्मष विरोध विद्वेष हउक निर्मल, हउक निःशेष-

चित्ते होक यत विघ्न अपगत नित्य कल्यानकाजे।’[६३]

तथैव इदानीन्तने काले अपि मानवैः, हितार्थं मानवानाम् एवाभीष्टम् इति शम्।

## परिशीलितग्रन्थसूची

**परिशीलितमुख्यग्रन्थाः**

१. *अमरार्थचन्द्रिका*; अमरसिंहः; गुरुनाथभट्टाचार्यः (सम्पादकः); कलिकाता- संस्कृत पुस्तक भाण्डार; १४०८ (बङ्गाब्दः)।

२. *ऋग्वेदसंहिता*; स्वामीसत्यप्रकाशसरस्वती सत्यकामविद्यालङ्कारश्च (अनुवादकौ); निउदिल्ली- वेदप्रतिष्ठानम्; १९७७।

३. *ऋग्वेदसंहिता* (स्कन्दस्वाम्युद्गीथीये भाष्ये वेङ्कटमाधवीया व्याख्यासहिता); विश्वबन्धुः (सम्पादकः); होशियारपुरम्- विश्वेश्वरानन्द वैदिकशोध संस्थानम्; १९६४ (प्रथमप्रकाशः)।

४. *ऋग्वेदसंहिता* (प्रथमखण्डः द्वितीयखण्डश्च); रमेशचन्द्रदत्तः (अनुवादकः); कलकाता- हरफ प्रकाशनी; २०११ (पुनर्मुद्रणम्, प्रथमप्रकाशः १३८३ बङ्गाब्दः)।

५. *ऋग्वेदसंहिता* (श्रीमत्सायणाचार्यविरचितभाष्यसमेता); वि.के. राजवाडेप्रमुखः (सम्पादकः); पुना- वैदिक संशोधन मण्डल; १९३३।

६. *यास्केर दृष्टिते वेदेर सौरदेवता अन्वीक्षा* (संख्या ३५); अमरकुमारचट्टोपाध्यायः; तपनशङ्करभट्टाचार्यः (सम्पादकः); कलकाता- यादवपुर विश्वविद्यालय; २०१४।

७. *पुराण परिचय*; अशोकचट्टोपाध्यायः; कलिकाता- मडार्ण वुक् एजेन्सी प्राइभेट् लिमिटेड्; १९७७ (प्रथमप्रकाशः)।

८. *प्राचीन भारतीय मूर्ति-विज्ञान*; वासुदेव-उपाध्यायः; वाराणसी- चौखम्बा संस्कृत सीरीज आफिस; २०२६ (विक्रमसंवत्, प्रथमसंस्करणम्)।

९. *गीतवितान*; रवीन्द्रनाथठाकुरः; कलिकाता- विश्वभारती ग्रन्थनविभाग; १३९८ बङ्गाब्दः (पुनर्मुद्रणम्, प्रथमप्रकाशः १३३८ बङ्गाब्दः)।

१०. *अष्टाध्यायी*; पाणिनिः; तपनशङ्करभट्टाचार्यः (सम्पादकः); कलकाता- संस्कृत बुक् डिपो; १९९२।

११. *अष्टाध्यायी*; पाणिनिः; वाराणसी- चौखम्वा सुरभारती प्रकाशन्; २००६।

१२. *हिन्दुदेर देवदेवीः उद्भव ओ क्रमविकाश* (प्रथमखण्डः); हंसनारायणभट्टाचार्यः; कलिकाता- फार्मा के. एल्. एम्. प्राइभेट् लिमिटेड्; १९८२ (द्वितीयसंस्करणम्)।

१३. *उत्तररामचरितम्*; भवभूतिः; सीतानाथ-आचार्यः देवकुमारदासश्च (सम्पादकौ); कलिकाता- संस्कृत पुस्तक भाण्डार; १९९८ (प्रथमसंस्करणम्)।

[६३] गीतवितान, पूजा पर्याय, पृष्ठाङ्कः १२८

१४. *अष्टादशपुराण दर्पण*; ज्वालाप्रसादमिश्रः; दिल्ली- नाग प्रकाशक; १९९० (पुनर्मुद्रणम्, प्रथमप्रकाशः १९०५)।
१५. *निरुक्तम्*; यास्काचार्यः; दिल्ली- मेहरचन्द्र लछमनदास; १९६३।
१६. *निरुक्तम्*; यास्काचार्यः; ब्रह्मचारिमेधाचैतन्यः (सम्पादकः); कलिकाता- दक्षिणेश्वर रामकृष्ण संघ; आद्यापीठ वालकाश्रम; २००२ (द्वितीयसंस्करणम्, प्रथमप्रकाशः १३९४ बङ्गाब्दः)।
१७. *बङ्गीय शब्दकोष*; हरिचरणवन्द्योपाध्यायः; निउ दिल्ली- साहित्य अकादेमि; १९७८ (पुनर्मुद्रणम्, खण्डशः प्रथमप्रकाशः १३४०-१३५३ बङ्गाब्दः)।
१८. *वेदेर परिचय*; योगीराजवसुः; कलकाता- फार्मा के. एल्. एम्. प्राइभेट् लिमिटेड्; २०१० (सप्तममुद्रणम्)।
१९. *मार्कण्डेयपुराणम्* (द्वितीयखण्डः); वेदव्यासः; श्रीरामशर्मा-आचार्यः (सम्पादकः); बरेली- संस्कृति-संस्थान; १९६७ ईशवीयाब्दः (प्रथमसंस्करणम्)।
२०. *मार्कण्डेयपुराणम्* (द्वितीयखण्डः); वेदव्यासः; गौरीनाथशास्त्री (सम्पादकः); शुभ्राशीलः (अनुवादकः); कलकाता- नवपत्र प्रकाशन; २०१२ (द्वितीयप्रकाशः)।

**परिशीलित-आङ्गलोग्रन्थाः**

1. *Treatment of Nature in the gveda*; Braj Bihari Chaubey; Hoshiarpur- Vedic Sahitya Sadan; 1970 (1st edition).
2. *Purānic Encyclopaedia*; Vettam Mani. Delhi- Motilal Banarasidass; 1975.
3. *A Critical Study of gveda*; Deoprakash Shastri; Delhi- Patanjal Publications; 1963.
4. *The Vedic Etymology*; Fatah Singh; Delhi- National Publishing House.

✶ ✶ ✶

# स्मृतिशास्त्रेषु गुणविवेचनम्

**ड.देवाञ्जनदासः** *

गुण इति शब्दः संस्कृतवाङ्मये सुप्रचलितः। किं तु विविधेषु शास्त्रेषु विविधेषु अर्थेषु अस्य प्रयोगो दृश्यते। आयुर्वेदशास्त्रे वस्तुशक्तिः, व्याकरणे स्वरवर्णविकारः, अलङ्कारशास्त्रे माधुर्यादयश्च गुणशब्देन अभिधीयन्ते। वैशेषिकशास्त्रे द्रव्याश्रितः अगुणवान् संयोग-विभागयोः निरपेक्षकारणात् पृथक् पदार्थ एव गुणपदवाच्यो भवति– 'द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। गुणत्वजातिमान् वा।'[१] मीमांसादर्शने, वेदान्तदर्शने, न्यायदर्शने च वैशेषिकसंमतो गुणपदार्थो गृहीतः। साङ्ख्यदर्शने गुणशब्देन सत्त्वं रजस्तमश्चेति निर्दिष्टम्। श्रीमद्भगवद्गीतायाः शाङ्करभाष्ये उक्तम्– 'सत्त्वं रजः तम इति एवं नामानः। गुणा इति पारिभाषिकः शब्दः, न रूपादिवत् द्रव्याश्रिताः'[२]। वाचस्पतिमिश्रमतेन– 'गुणा इति परार्थाः'[३]। पुरुषस्य उपकारता एव परार्थपरता। अन्यस्य उपकारकम् एव गुणशब्देन अभिहितम् इति पूर्वमीमांसासम्मतम्। तथा च यागानाम् उपकारकत्वात् दध्यादीनां गुणसंज्ञेति। उपकारकत्वधर्मात् सत्त्वादीनां गुणसंज्ञा भवति। पुरुषस्य भोगसाधनम् अपवर्गसम्पादनं च उपकारपदेन परिगण्येते। वस्तुतः साधनतत्त्वे सत्त्वादिगुणैः प्रयोजनम् अनस्वीकार्यम्।[४] इदानीं गुणत्रयस्य लक्षणम् उक्तं– प्रीत्यप्रीतिविषादात्मका इति। प्रीतिरित्यस्यार्थः सुखम्, अप्रीतिरित्यस्यार्थो दुःखं, विषादस्यार्थो मोहश्चेति। परस्परविरुद्धस्वभावत्वात् प्रीत्यप्रीतिविषादात्मकत्वं कस्यापि गुणस्य लक्षणं भवितुं नार्हतीति शास्त्रसम्मतम्। किं तु श्रीमद्भगवद्गीतायां श्रीकृष्णद्वैपायनेन साङ्ख्यमतप्रकाशकाले उक्तम्–

> सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
> निबध्नन्ति महावाहो देहे देहिनमव्ययम्॥

[गीता १४.५]

'अप्रतिषिद्धं परमतम् अनुमतं भवति' इति न्यायानुसारेण गीतायाम् उल्लिखितेन

---

* सहायकाध्यापकः, संस्कृतविभागस्य, झाडग्राम-राजकीय-महाविद्यालयस्य

१ तर्कसङ्ग्रहदीपिका

२ गीता १४.५

३ सांख्यतत्त्वकौमुदी

४ *Annambhaṭṭa, Tarkasaṃgraha*, ed. with Beng. trans. and exp. Narayanchandra Goswami, pp. 44-45.
Vācaspatimiśra, *Śāṃkhyatattvakaumudī*, ed. with Beng. trans. and exp. Narayanchandra Goswami, pp. 127–128

सत्त्वादिक्रमेण प्रीत्यादयः यथासंख्यं वेदितव्यम्। एतदुक्तं भवति- प्रीत्यात्मकः सत्त्वगुणः, अप्रीत्यात्मको रजोगुणः, विषादात्मकः तमोगुण इत्यर्थः।[५] तत्रोक्तं मनुसंहितायामपि-

सत्वं रजस्तमश्चैव त्रीन् विद्याद् आत्मनो गुणान्।
यैर्व्याप्येमान् स्थितो भावान् महान् सर्वान् अशेषतः॥

[मनुसंहिता १२.२४]

वस्तुतः यद्यपि दार्शनिकानां मध्ये गुणस्वरूपविषये तल्लक्षणविषये च मतभिन्नतास्ति, तथापि सांख्यसंमतं गुणत्रयं मानवात्मनो बन्धनविमोचनार्थं, जगति मूल्यबोधस्य च विकाशार्थम् सर्वत्रैव स्वीकृतम्। सांख्यस्वीकृतं गुणत्रयं श्रीमद्भगवद्गीतायां मानवधर्मशास्त्रे च सुप्रपञ्चितम्। गीतायां न केवलं गुणस्वरूपं प्रयोजनं च निर्णीतम्, अपि च शारीरं वाचिकं मानसं कर्म च गुणत्रयेण अन्वितमिति प्रदर्शितम्। श्रद्धात्रयविभागयोग इति गीतायाः सप्तदशाध्याये सात्त्विकादिभेदेन पूजानाम्, आहाराणां, यज्ञानां, शारीर-वाचिक-मानस-तपस्यानां, दानक्रियाणां च त्रिविधत्वं प्रदर्शितम्। अपि च मोक्षयोग इति गीताया अष्टादशाध्याये ज्ञानं, कर्म, कर्ता, बुद्धिः, धृतिः, सुखं चेति सात्त्विक-राजस-तामस-भेदेन त्रिविधं भवतीति दृष्टम्। यतो गीता ब्रह्मविद्यारूपा योगशास्त्रम्, ततो गुणत्रयेण कथं परम-पुरुषार्थो मोक्षलाभः सम्भवतीत्यर्थं गुणत्रयस्य पर्यालोचना उपलभ्यते। भृगुप्रोक्ते मानवधर्मशास्त्रे तु व्यावहारिके काले गुणत्रयं समाजस्य कल्याणार्थं प्रयुज्यते।[६]

संप्रति सत्त्वादीनां लक्षणं निरूपणीयम्। यथार्थावभासो ज्ञानं तत् सत्त्वस्य लक्षणम्, एतद्विपरीतमज्ञानं तत् तमोलक्षणम्, विषादाभिलाषं मानसकार्यं रजोलक्षणम्। वस्तुतस्तु सत्त्वादि प्रीत्यप्रीतिविषादात्मकम्। तथा चोक्तम्-

प्रीत्यप्रीतिविषादात्मकाः प्रकाश-प्रवृत्ति-नियमार्थाः।
अन्योऽन्याभिभवाश्रय-जनन-मिथुन-वृत्तयश्च गुणाः॥

[साङ्ख्यकारिका १२]

टीकायां व्याख्यातम्- "'अन्योन्याभिभववृत्तयः', एषाम् अन्यतमेन अर्थवशाद् उद्भूतेनान्यद् अभिभूयते। तथा हि सत्त्वं रजस्तमसी अभिभूय शान्ताम् आत्मनो वृत्तिं प्रतिलभते, एवं रजः सत्त्व-तमसी अभिभूय घोराम्, एवं तमः सत्त्व-रजसी अभिभूय मूढाम् इति। 'अन्योन्याश्रयवृत्तयः' यद्यपि आधाराधेयभावेन नाश्रयार्थो घटते, तथापि यदपेक्षया यस्य क्रिया स

---

[५] Ibid., pp. 128–130

[६] Surendranath Dasguta, *A History of Indian Philosophy*, vol. II, pp. 468–470.

तस्याश्रयः। तथा हि सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेन उपकरोति, रजः प्रकाशनियमावाश्रित्य प्रवृत्त्या, इतरयोः तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति। 'अन्योन्यजननवृत्तयः' अन्यतमोऽन्यतमं जनयति। जननं च गुणानां सदृशरूपः परिणामः। अत एव न हेतुमत्त्वं, तत्त्वान्तरस्य हेतोरभावात्। नापि अनित्यत्वं, तत्त्वान्तरे लयाभावात्। 'अन्योन्यमिथुनवृत्तयः' अन्योन्यसहचराः, अविनाभाववृत्तय इति यावत्।"[७] प्रकाश-प्रवृत्ति-नियमार्थं गुणैः प्रयोजनमस्ति। परं तु कथं ते इत्थम्भूता इति जिज्ञासाया निरसनार्थम् आह–

सत्त्वं लघु प्रकाशकम् इष्टम् उपष्टम्भकं चलं च रजः।
गुरुवरणकम् एव तमः प्रदीपवच्चार्थतो वृत्तिः॥

[साङ्ख्यकारिका १३]

किं तु गुणानां प्रत्यक्षयोग्यता नास्ति। सुखदुःखमोहात्मककार्यस्य कारणरूपेण सुखदुःखमोहात्मकं गुणत्रयम् अनुमेयम्। मानवधर्मशास्त्रे उक्तं– तस्मिन् आत्मनि यत् संवेदनं प्रीतिसंयुक्तं, प्रत्यस्तमितक्लेशं, प्रकाशरूपं चानुभवेत्– तत् सत्त्वं जानीयात्। आत्मनि मनसि शरीरे वा प्रीतिसंयुक्तं संवेदनं समस्तहेयविकारविधुरत्वात् प्रशान्तमिव, रजस्तमोभ्याम् अकलुषितं, मद-मान-राग-द्वेष-लोभ-मोह-भय-शोक-मात्सर्य-दोष-रहितं शुद्धमिवा भाति। यत् पुनः संवेदनं दुःखानुविद्धम्; अतएव सत्त्वशुद्धात्मप्रीतेरजनकं सर्वदा च शरीरिणां विषयस्पृहोत्पादकं तत्त्वनिवारकत्वात् प्रतिपक्षं– तत् रजो जानीयात्। वस्तुत एतत् रजसं स्पृहाजनकमिति। यत् पुनः मोहसंयुक्तं तथा सदसद्विवेकशून्यम्, अस्फुटविषयाकारस्वभावं, तर्कविज्ञानाभ्यां रहितम्, अन्तःकरणबहिःकरणाभ्यां दुर्ज्ञातं– तत् तमो जानीयात्।[८] एतेषां सत्त्वादीनां त्रयाणां गुणानां यथाक्रमम् उत्तममध्यमाधमरूपाणि यानि फलानि– तं विशेषेण वक्ष्यन्ते मनुमहोदयेन। वेदाभ्यासः, प्राजापत्याद्यनुष्ठानं, शास्त्रार्थावबोधो, मृज्जलाभ्यां बाह्यशौचम्, इन्द्रियसंयमो, दानादि-धर्मानुष्ठानम्, आत्मध्यानपरता वेदान्तविचारणा– एतत् सत्त्वाख्यगुणस्य कार्यम्। काम्य-कर्मनिष्ठता, अधैर्यम्, अल्पेऽप्यनर्थे महद्वैकल्पं, निषिद्धकर्माचरणम्, अजस्रं शब्दादिविषयोपभोग– इत्तेतद् रजोऽभिधानगुणस्य कार्यम्। अधिकाधिकधनस्पृहा, निद्रात्मता, स्वल्पेऽपराधे वैरानुबन्धः, परलोकाभावबुद्धिः, आचारपरिलोपो, याचनशीलत्वं, धर्मादिषु अनवधानम्– इत्येतत् तामसाभिधानस्य गुणस्य लक्षणम्।

किं तु जीवेषु गुणत्रयाणां लिङ्गं कीदृशेन प्रकाशयेत्, तदेव सामासिकं प्रवक्ष्यते मनुमहोदयेन। यत् शास्त्रसंमतं कर्म सर्वात्मना ज्ञातुमिच्छति,

---

७ साङ्ख्यतत्त्वकौमुदी

८ *Mānava-dharma-śāstra*, pp. 1493–1495.

यच्च कर्माचरणकालत्रयेपि न लज्जति, येन येन कर्मणा कर्मानुशीलनकारिणः संतुष्टिर्जायते– तदेव सात्त्विकं कर्म। इह लोके महतीं ख्यातिं प्राप्नुयामित्येतदर्थमेव यो यत् कर्म करोति, स च तत् कर्मफलासम्पत्तौ दुःखी भवति– तद् राजसिकं कर्म। यत् कर्म कृत्वा कुर्वन् करिष्यंश्च लज्जावान् भवति– तदेव तामसिकं कर्म।[९] तदुक्तं श्रीमच्छंकरभगवद्पादेन– 'यत्तत् सुखमग्रे पूर्वं प्रथमसंनिपाते ज्ञानवैराग्यध्यानसमाध्यारम्भे अत्यन्तायासपूर्वकत्वात् विषमिव दुःखात्मकं भवति, परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखम् अमृतोपमं तत् सुखं सात्त्विकं प्रोक्तं विद्वद्भिः आत्मनो बुद्धिरात्मबुद्धिः आत्मबुद्धेः प्रसादो नैर्मल्यं सलिलवत्स्वच्छता ततो जातम् आत्मबुद्धिप्रसादजम् आत्मविषया वा आत्मालम्बना वा बुद्धिः आत्मबुद्धिः तत् प्रसादप्रकर्षाद्वा जातमित्येतत् तस्मात् सात्त्विकं तत्।...विषयेन्द्रियसंयोगाद् यत् तत् सुखं जायते अग्रे प्रथमक्षणे अमृतोपमम् अमृतसमं परिणामे विषमिव बलवीर्यरूप-प्रज्ञा-मेधा-धनोत्साह-हानिहेतुत्वाद् अधर्म-तज्जनित-नरकादिहेतुत्त्वाच्च परिणामे तदुपभोग-विपरिणामान्ते विषमिव तत्सुखं राजसं स्मृतम्।...यदग्रे चानुबन्धे च अवसानेत्तरकाले सुखं मोहनं मोहकरम् आत्मनो निद्रालस्य-प्रमादोत्थं निद्रा चालस्यं प्रमादश्चेत्येतेभ्यः समुत्तिष्ठतीति निद्रालस्य-प्रमादोत्थं तत् तामसम् उदाहृतम्'[१०]। वस्तुतः कामप्रधानता तमसो लक्षणम्, अर्थनिष्ठता रजसो, धर्मप्रधानता सत्त्वस्य लक्षणम्। एषां च कामादीनाम् उत्तरोत्तरस्य श्रेष्ठत्वं प्रदर्शितं मनुसंहितायाम्। कामाद् अर्थः श्रेयान् अर्थमूलकत्वात् कामस्य, ताभ्यां च धर्मः तन्मूलत्वात्तयोः।

किं तु एतेषां सत्त्वादीनां गुणानां मध्ये स्वकार्येण येन गुणेन जीवाः यानि जन्मानि प्राप्नुवन्ति, तानि एव आलोचितव्यानि। तत्रोच्यते–

> देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः।
> तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः॥

[मनुसंहिता १२.४०]

या सत्त्वादिगुणत्रयनिमित्ता त्रिविधा जन्मान्तरप्राप्तिः उक्ता, सा देश-कालादिभेदेन संसार-हेतुभूत-कुशलाकुशलकर्मवशात् अधम-मध्यमोत्तमभेदेन पुनस्त्रिविधेति बोद्धव्या। प्रथमतः, स्थावरा, वृक्षादयः, कृमयः, तेभ्य ईषत्स्थूलाः कीटाः, तथा मत्स्य-सर्प-कूर्म-पशु-मृगाश्च– इत्येषा तमोनिमित्ता जघन्या गतिः। हस्ति-अश्व-शूद्र-म्लेच्छ-सिंह-व्याघ्र-शूकरास्तमोगुणनिमित्ता मध्यमा गतिः। चारणा, नटादयः, पक्षिणः, छद्मना कर्मकारिणः, पुरुषा, राक्षसाः, पिशाचाश्च

९ Ibid., pp.1495-1498.

१० गीता १८.३७– ३९, पृष्ठम् ७१८-७१९

इत्येषा तामसीषु उत्तमा गतिः। द्वितीयतः, यष्टिप्रहरणा, बाहुयोधिनः, रङ्गावतारका नटाः, शस्त्रजीविद्यूतपानप्रसक्ताश्च पुरुषा अधमा राजसीगतिर्ज्ञेया। राजानः तथा क्षत्रिया, राजपुरोहिताः, शास्त्रार्थकलहप्रियाश्च– एषा राजसीगतिर्मध्यमा। गन्धर्वाः चित्ररथयः, गुह्यकाः, बालादिहिंसाकारिणो मायाप्रधानाः, यक्षा धनरक्षाकारिणः, देवानुयायिनो विद्याधरादयः, उर्वश्यादयः अप्सरसः– सर्वा इत्येषा राजसीषु उत्तमा गतिः। तृतीयतः, वानप्रस्था भिक्षवो ब्राह्मणाश्च, अप्सरसो व्यतिरिक्ताः पुष्पकादि-विमानचारिणो, नक्षत्राणि, दैत्याश्च– इत्येषा सत्त्वनिमित्ता अधमा गतिः। यागशीला, ऋषयो, देवा, वेदाभिमानिनो, देवताविग्रहवत्य इतिहासप्रसिद्धा, ध्रुवादीनि ज्योतिंषि, वत्सराधिष्ठात्री देवता, सोमपादयः पितरः, देवयोनि-विशेषाः साध्या– इत्येषा सत्त्वनिमित्ता मध्यमा गतिः। चतुर्वदनो ब्रह्मा, मरीच्यादयो विश्वसृजो, धर्मो विग्रहवान्, महान्, सांख्यप्रसिद्धं तत्त्वज्ञम्– एतां सत्त्वनिमित्ताम् उत्कृष्टां गतिं पण्डिता वदन्ति।[११] गीतायाम् उक्तम्–

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः॥

[गीता १४.१८]

श्रीधरस्वामिना व्याख्यातं– 'सत्त्वस्थाः सत्त्ववृत्तिप्रधाना ऊर्ध्वं गच्छन्ति। सत्त्वोत्कर्षतारतम्याद् उत्तरोत्तरशतगुणानन्दान् मनुष्य-गन्धर्व-पितृ-देवादिलोकान् सत्यलोकपर्यन्तान् प्राप्नुवन्तीत्यर्थः। राजसास्तु तृष्णाद्याकुला मध्ये तिष्ठन्ति मनुष्यलोक एवोत्पद्यन्ते। जघन्योऽतिनिकृष्टस्तमोगुणस्तस्य वृत्तिः प्रमादमोहादिस्तत्र स्थिता अधो गच्छन्ति। तमोवृत्तितारतम्यात् तामिस्रादिषु निरयेषु उत्पद्यन्ते।'

मानवा मनसा वाचा कायेन वा कर्माणि कुर्वन्ति। मनसा यत् सुकृतं दुष्कृतं वा कर्म कृतम्, तत् फलं सुखदुःखस्वरूपमेव भवति। तदेव इह जन्मनि जन्मान्तरे वा मनसैवायमुपभुङ्क्ते। एवं वाचा कृतं शुभाशुभं वाग्द्वारेण मधुरगद्गदभाषित्वादिना, शारीरं शुभाशुभं शरीरद्वारेण स्रक्-चन्दनादि-प्रियोपभोग-व्याधितत्वादिना अनुभवति।[१२] अनेन गुणत्रयस्य स्वरूपम्, तत्प्रयोजनं च प्रदर्शितम्। अपि च गुणसकलस्य अनुशीलनकारिणैः कीदृशी गतिः प्राप्ता, तदेव मनुसंहिता गीता चेति स्मृतिशास्त्रेषु सम्यग्रूपेण आलोचितम्। फलतो व्यावहारिकजीवने कर्तव्याकर्तव्यनिर्णये गुणत्रयस्य विमर्शता अतीव प्रयोजनीया। न केवलं अपवर्गलाभार्थम्; अपि च समाजस्य शृङ्खलास्थापनार्थम्, उन्नतिविधानार्थम्, मानवात्मनः सौकर्यविधानार्थम्, मूल्यबोधस्य शिक्षणार्थं च– स्मृतिशास्त्रानुसारेण

[११] Ibid., pp.1498-1503.
[१२] Ibid., pp. 1481-1482

गुणत्रयविवेचनम् वर्तमानकालेऽपि अत्यन्तं प्रासङ्गिकम्।

## Bibliography

1. *Tarkasaṃgraha*; Annaṃbhaṭṭa (Ed. with auto-comm.); Tarkasaṃgrahadīpikā and Beng. comm. Adhyāpanā Narayan Chandra Goswami; Kolkata- Sanskrit Pustak Bhandar; 1410 BS. (3rd ed.).
2. *A History of Indian Philosophy* Vol. 2; Surendranath Dasgupta; Delhi/Varanasi/Patna : MLBD; 1975. (1st ed. 1922, Cambridge University).
3. *Mānava-dharma-śāstra (= Manusaṃhitā / Manusmṛti)*; Viswanath Narayan Mandlik (Ed. with Sans. comm.); . Bombay : Ganpat Krishnaji, 1807 Śaka. (website version).
4. *Saṃkhyatattavakaumudī*; Vācaspatimiśra; Adhyāpanā Narayan Chandra Goswami (Ed. with Beng. comm.); Kolkata- Sanskrit Pustak Bhandar; 1406 BS. (3rd ed. ; 1st ed. 1389 BS).

✶ ✶ ✶

# पदविमर्शः

पङ्कजराउलः*

## १. उपोद्घातः

लोकव्यवहारे अस्माभिः दृश्यते यद् एकस्माद् वर्णादेव सर्वदा अर्थबोधो न जायते किन्तु वर्णानां समष्टिरूपपदात् अर्थबोधः सहजतया भवति। पदमेव व्यवहारे अर्थज्ञानस्य उपायो वर्तते। लोके ये शब्दाः व्यवह्रियन्ते येभ्यः शब्देभ्यः अस्माकं अर्थबोधश्च जायते ते शब्दा अवश्यं पदसंज्ञा भवन्ति। पदसंज्ञां विना तेषां शब्दानां प्रयोगार्हता नागच्छति। महर्षिणा पतञ्जलिना स्वविरचिते महाभाष्ये एकं वचनमुक्तं- 'नापदं प्रयुञ्जीत' इति। तस्यार्थः पदसंज्ञकं यन्न भवति तस्य शब्दस्य प्रयोगोऽपि न भवति। अतः शब्दानां प्रयोगार्थं पदसंज्ञा विधेया। पदसंज्ञा च व्याकरणशास्त्रे महर्षिणा पाणिनिना 'सुप्तिङन्तं पदम्' (अष्टाध्यायी १.४.१४) इति सूत्रेण विहिता। साहित्यशास्त्रेऽपि कविराजविश्वनाथेन उक्तम्- 'वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः'[१] इति। अतः एतेन ज्ञायते यत् पदसंज्ञाकरणार्थं प्रातिपदिकरूपशब्दाद् विभक्तिः योजनीया। विभक्त्यन्तं पदमेव प्रयोगार्हं भवति तस्मादेव अर्थबोधो जायते। पदञ्च वर्णसंघातरूपमेव भवति। महर्षिः कात्यायनः 'सरूपाणामेकशेष एकविभक्तौ' (अष्टाध्यायी १.२.६४) इति सूत्रेण वर्णसंघातस्यैव वाचकत्वं प्रतिपादितम्। पतञ्जलिनाऽपि 'समर्थानां प्रथमाद्वा' (अष्टाध्यायी ४.१.८२) इति सूत्रस्य भाष्ये पदस्य वाचकत्वं स्वीकृतम्। तत्र भाष्ये आचार्येणोक्तं- 'किं पुनः सामर्थ्यम? अर्थाभिधाने यत् सामर्थ्यम्। किं पुनस्तत्? कृतवर्णानुपूर्वीकं पदम्' इति । अर्थात् वर्णाः यदा सङ्घातरूपेण पदसंज्ञां लभन्ते तादृशात् वर्णानुपूर्वीकात् पदादेव अर्थबोधो जायते। अतः वर्णसमष्टिरूपस्य पदस्यैव वाचकत्वं स्वीकार्यम्।

## २. व्याकरणमते पदम्

भगवता पतञ्जलिना व्याकरणशास्त्रे महाभाष्यम् इति ग्रन्थः प्रणीतः। यः संस्कृतव्याकरणस्य प्रमाणग्रन्थरूपेण विद्वद्भिः समाद्रियते। तस्मिन् ग्रन्थे भगवता 'नाऽपदं शास्त्रे प्रयुञ्जीत' इत्युक्तम्। तस्यार्थो भवति अस्मिन् शब्दशास्त्रे पदं विना किमपि न प्रयुज्यते अर्थात् पदसंज्ञकं विना शब्दानां प्रयोगो नैव भवति। पदसंज्ञाऽभावे शब्दस्य प्रयोगे तु अप्रामाणिकत्वं तस्य भवति इत्याशयः। अनेन प्रमाणीभूतवाक्येन व्याकरणशास्त्रे पदस्य मुख्यता प्रयोजनीयता च स्फुटीभवति।

---

* शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

१ साहित्यदर्पणस्य द्वितीयपरिच्छेदे, पृष्ठम् २५

तस्मात् किमिदं पदमिति पदसंज्ञाविषये जिज्ञासा उत्पद्यते। महर्षिणा पाणिनिना अष्टाध्याय्यां पदसंज्ञाविधायकानि चत्वारि सूत्राणि उक्तानि। तानि भवन्ति- (१) सुप्तिङन्तं पदम् (२) स्वादिष्ववर्वनामस्थाने (३) सिति च (४) नः क्ये इति। सूत्राणामर्थः समासेन आलोच्यते-

## (१) सुप्तिङन्तं पदम् (१।४।१४)

पदसंज्ञाविधायकमिदं मुख्यं सूत्रं वर्तते। सूत्रेऽस्मिन् सुप्तिङन्तम् इति समस्तं पदं वर्तते। सुप च तिङ् च सुप्तिङौ इति इतरेतरयोगद्वन्द्वः। सुप्तिङौ अन्तौ यस्य तत् सुप्तिङन्तम् इति बहुव्रीहिः। एवञ्च द्वन्द्वगर्भबहुव्रीहिसमासोऽत्र वर्तते। द्वन्द्वादौ द्वन्द्वान्ते च श्रुयमाणं पदं प्रत्येकमभिसम्बद्ध्यते इति नियमेन अन्तशब्दस्य सुप् इत्यनेन तिङ् इत्यनेन च सह योगो भवति। तेन सुबन्तं तिङन्तं च इत्यर्थो लभ्यते। एवञ्च सूत्रार्थो भवति- सुबन्तं तिङन्तञ्च पदसंज्ञं स्यादिति। सुप्-प्रत्ययः प्रातिपदिकात् विधीयते तिङ्-प्रत्ययश्च धातोः विधीयते। यस्मात् प्रातिपदिकात् सुप्-प्रत्ययो भवति तत् सुबन्तं पदम् इत्युच्यते। यस्मात् धातोः तिङ्-प्रत्ययो भवति तत् तिङन्तं पदम् इत्युच्यते। एवञ्च सुप्तिङन्तं पदम् इति सूत्रेण सुबन्तस्य तिङन्तस्य च पदसंज्ञा सिध्यति। पदसंज्ञाकरणानन्तरमेव तस्य प्रयोगो भवति लोके। विभक्तिश्च इति सूत्रेण सुप् तिङ् इत्यनयोः विभक्तिसंज्ञा विधीयते। अतः ते विभक्त्यन्ताः पदम् इति वाक्यमपि प्रसिद्धमस्ति। तस्यार्थः सुब्विभक्त्यन्तं तिङ्विभक्त्यन्तं च पदसंज्ञं भवतीति। सुबन्तपदानाम् उदाहरणानि यथा- रामः गौः अश्वः लता इत्यादिशब्दाः। तिङन्तपदानाम् उदाहरणानि यथा- करोति खादति सेवते इत्यादीनि क्रियापदानि।

## (२) स्वादिष्वसर्वनामस्थाने (१।४।१७)

षड्विधेषु पाणिनीयसूत्रेषु इदं संज्ञासूत्रं वर्तते। स्वादिषु असर्वनामस्थाने इति पदच्छेदः सूत्रस्य। अस्मिन् सूत्रे स्वादिपदेन 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' (अष्टाध्यायी ४.१.२) इति सूत्रात् 'उरः प्रभृतिभ्यः कप्' (अष्टाध्यायी ५.४.१५१) इति सूत्रपर्यन्तं सर्वे प्रत्यया गृह्यन्ते। 'सुडनपुंसकस्य' (अष्टाध्यायी १.१.४३) इति सूत्रेण सुप्प्रत्ययेषु सु औ जस् अम् औट् चेति पञ्चानां सर्वनामस्थानसंज्ञा विहिता। एवञ्च प्रकृते असर्वनामस्थाने इति विशेषणपदेन सर्वनामस्थानसंज्ञकान् स्वादिप्रत्ययान् विहाय अन्ये प्रत्ययाः गृह्यन्ते। तेन सूत्रार्थो भवति- कप्प्रत्ययावधिषु असर्वनामस्थानेषु स्वादिप्रत्ययेषु परतः पूर्वस्य पदसंज्ञा भवतीति। सुप्तिङन्तं पदम् इति सूत्रेण सुप्प्रत्ययसहितसमुदायस्य पदसंज्ञा विधीयते परन्तु अनेन सूत्रेण सुप्प्रत्यये परे पूर्वस्य शब्दस्यैव पदसंज्ञा विधीयते इति विशेषः। अनेन सूत्रेण विहितायाः

संज्ञायाः फलं भवति दद्भ्याम् इत्यादिरूपसिद्धिः। दन्तशब्दात् भ्याम्प्रत्यये 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' (अष्टाध्यायी ६.१.६३) इति सूत्रेण विकल्पेन दत् इत्यादेशे दत् भ्याम् इति भवति। भ्याम् इति असर्वनामस्थानस्वादिप्रत्ययः अस्ति अतः तस्मिन् परे पूर्वस्य दत् इति शब्दस्य स्वादिष्वसर्वनामस्थाने इति सूत्रेण पदसंज्ञा भवति। तेन दत् इत्यत्र तकारः पदस्य अन्ते वर्तते अतः तस्य पदान्तत्वात् 'झलां जशोऽन्ते' (अष्टाध्यायी ८.२.३९)इति सूत्रेण तकारस्य जशत्वे दद्भ्याम् इति रूपं सिध्यति।

## (३) सिति च (१।४।१६)

सूत्रेऽस्मिन् सुप्तिङन्तं पदम् इत्यस्मात् पदम् इत्यनुवर्तते। स् इत् यस्य स सित् तस्मिन्निति सिति इति बहुव्रीहिसमासः। सिति परे पूर्वं पदसंज्ञं स्यादिति सूत्रार्थः। अनेन सूत्रेणापि प्रत्यये परे केवलं पूर्वस्थितस्य शब्दस्य पदसंज्ञा विधीयते। स्वादिष्वसर्वनामस्थाने इति सूत्रेणैव सिद्धे सिति च इति सूत्रस्य किं प्रयोजनमिति चेदुक्तं वैयाकरणसिद्धान्तकौमुद्याः बालमनोरमायां भसंज्ञापवादोऽयम् इति। अर्थात् इदं सूत्रं भसंज्ञाया अपवादो वर्तते। स्वादिष्वसर्वनामस्थाने इति सूत्रेण यत्र पदसंज्ञा विधीयते तत्रैव यकारादिषु अजादिषु च प्रत्ययेषु 'यचि भम्' (अष्टाध्यायी १.४.१८) इति सूत्रेण भसंज्ञाऽपि विधीयते। परन्तु 'आ कडारादेका संज्ञा' (अष्टाध्यायी १.४.१) इति सूत्रेण 'कडाराः कर्मधारये' (अष्टाध्यायी २.२.३८) इत्यतः प्राक् एकस्य एका एव संज्ञा भवति। एवं स्थितौ 'या परा अनवकाशा च' इति वाक्येन परत्वात् अनवकाशत्वाच्च यचि परे अर्थात् यकारादिषु अजादिषु च परेषु पूर्वस्य यचि भम् इत्यनेन भसंज्ञैव भवति, न तु पदसंज्ञा। तथा सति पर्शूनां समूहः पार्श्वम् इत्युदाहरणे णस्-प्रत्ययस्य अनुबन्धलोपे अ इति अजादिप्रत्यये परे पूर्वस्य भसंज्ञा स्यात् न तु पदसंज्ञा। तेन पर्शु अ इति दशायां भसंज्ञकस्य उकारस्य गुणापत्त्या इष्टसिद्धिर्न स्यात्। तस्मात् भसंज्ञाया अपवादरूपेण सिति च इति सूत्रारम्भः। तेन पर्शु अ इत्यत्र सिति परे पर्शुशब्दस्य भसंज्ञां बाधित्वा पदसंज्ञैव विधीयते। अतः अभत्वात् उकारस्य गुणाभावेन पार्श्वम् इति इष्टसिद्धिर्भवति। 'पर्श्वा णस् वक्तव्यः' इति वार्तिकेन अत्र णस्प्रत्ययो विधीयते।

## (४) नः क्ये (१।४।१५)

अनेन सूत्रेणापि पदसंज्ञा विधीयते। नः इति प्रथमान्तं पदम्, नकारादकार उच्चारणार्थः। क्ये इति सप्तम्यन्तं पदम्। क्यग्रहणेन क्यच्क्यङोर्ग्रहणम्। सूत्रेऽस्मिन् सुप्तिङन्तं पदम् इत्यस्मात् सुबन्तं पदम् इत्यंशस्य अनुवर्तनं भवति। सुबन्तं नकारेण विशेष्यते अतः 'येन विधिस्तदन्तस्य' (अष्टाध्यायी १.१.७२) इति परिभाषया तदन्तविधिना नान्तं सुबन्तम् इत्यर्थो लभ्यते। एवञ्च सूत्रार्थो भवति-

क्यचि क्यङि च परे नान्तं सुबन्तं पदसंज्ञं स्यादिति। ननु सुप्तिङन्तं पदम् इत्यनेनैव सिद्धे इदं सूत्रं किमर्थमिति जिज्ञासा जायते। तत्समाधानमुच्यते सिद्धे सत्यारभ्यमाणो विधिर्नियमाय कल्पते इति। एवञ्च अस्य सूत्रस्य नियमस्वरूपं भवति- क्यचि क्यङि च नान्तमेव पदं स्यान्नान्यत्। अर्थात् पदत्वसिद्धे पुनः पदसंज्ञाविधानेन अत्र नियमः क्रियते, स च नियमो भवति यदि क्यप्रत्यये परे पूर्वस्थितस्य शब्दस्य पदसंज्ञा क्रियते तर्हि नकारान्तशब्दस्यैव भवति नान्यस्य इति। पदसंज्ञायाः बहूनि फलानि सन्ति- नकारलोपः जश्त्वं वकारलोपश्च। तत्र क्यशब्देन क्यच्क्यङोरेव ग्रहणं भवति प्रकरणप्राप्तस्य क्यष् इत्यस्य ग्रहणं तु न भवति। 'लोहितादिडाज्भ्यः क्यष्' (अष्टाध्यायी ३.१.१३) इति सूत्रेण विधीयमानः क्यष्-प्रत्ययो हलन्ताद् धातोरेव न भवति। अतः तस्मिन् परे पदप्रयुक्तकार्यमेव न प्राप्नोति तस्मात् निषेधस्यापि प्रयोजनं नास्ति। अनेन सूत्रकृतनियमेन गव्यति इत्यत्र गव् इति शब्दस्य पदसंज्ञाभावात् वकारस्य लोपो न भवति।

अस्य सूत्रस्य उदाहरणं यथा राजीयति इति। आत्मनो राजानम् इच्छति इत्यर्थे राजन् अम् इति सुबन्तात् 'सुप आत्मनः क्यच्' (अष्टाध्यायी ३.१.८) इति सूत्रेण क्यचि अनुबन्धलोपे समुदायस्य 'सनाद्यन्ता धातवः' (३.१.३२) इत्यनेन धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' (अष्टाध्यायी २.४.७१) इति सूत्रेण अम् इत्यस्य लोपे राजन् य इति दशायां नः क्ये इति सुत्रेण राजन् इत्यस्य पदसंज्ञा सिध्यति। अतः पदान्तस्य नकारस्य 'न लोपः प्रातिपदिकान्तस्य' (अष्टाध्यायी ८.२.७) इत्यनेन लोपे राज य इति भवति, ततः क्यचि च इति सूत्रेण अकारस्य ईत्वे राजीय इत्यस्मात् तिपि शपि पररूपे च कृते राजीयति इति रूपं सिध्यति।

## २.१. पदभेदाः

पदस्य चत्वारो भेदाः भवन्ति- नाम-आख्यात-उपसर्ग-निपाताः चेति। यद्यपि महर्षिणा पाणिनिना पदस्य भेदद्वयमेव स्वीकृतं सुबन्तं तिङन्तञ्चेति तथापि सर्वे वैयाकरणाः चतुरः एव भेदान् स्वीकुर्वन्ति। यास्काचार्यः स्वग्रन्थे निरुक्ते पदभेदान् वर्णितवान्- 'चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च' [२] इति। अर्थात् पदस्य चतस्रो जातयो भवन्ति- १.नामजातिः २.आख्यातजातिः ३.निपातजातिः ४.उपसर्गजातिश्च इति।

### २.१.१.नामानि

नाम्नां लक्षणमाह यास्काचार्यः 'सत्त्वप्रधानानि नामानि' इति। सीदति अन्वेति लिङ्गसङ्ख्यादिकम् अस्मिन्निति सत्त्वं द्रव्यम्। नमन्ति आख्यातशब्दे गुणभावेन इति नामानि। नाम्नः चत्वारोऽर्थाः भवन्ति सत्त्व-द्रव्य-संख्या-लिङ्गानि।

[२] निरुक्तस्य प्रथमाध्याये, पृष्ठम् २

तेषु सत्त्वस्यैव मुख्यता भवति। अत एवोक्तं सत्त्वप्रधानानि नामानि इति। अपवर्गपर्यन्तम् अभिनिवर्तमानं मूर्तं किमपि रूपान्तरमापन्नं सत्त्वभूतं लिङ्गसंख्यायुक्तैः सत्त्वनामभिः आचष्टे, यथा- 'प्रव्रज्यापंक्तिः' इति। 'अदः' इति सत्त्वस्य सामान्यस्वरूपमस्ति। सत्त्वस्य विशेषस्वरूपञ्च 'गोरश्वः पुरुषो हस्तीति' इति।

### २.१.२ आख्यातम्

आख्यातस्य लक्षणमाह 'भावप्रधानम् आख्यातम्' इति। भाव एव भावना, सा च असत्त्वभूतो धात्वर्थोऽत्र गृह्यते। भावनैव साध्यत्वेन अभिधीयमाना क्रिया इत्युच्यते। यथोक्तं वाक्यपदीये -

> यावत् सिद्धमसिद्धं च साध्यत्वेनाऽभिधीयते।
> आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥

(वाक्यपदीयम् ०३.०८.०१) इति।

सोऽयं भावः प्रधानं यत्र गुणीभूतानि चान्यानि कारणानि तदिदं भावप्रधानम् आख्यातम् इत्युच्यते। आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि अनेन इत्याख्यातम्। आख्यातञ्च चतुष्प्रकारकं भवति- कर्तरि कर्मणि भावे कर्मकर्तरि च। तत्र पचति देवदत्तः इति कर्तरि। पच्यते ओदनो देवदत्तेन इति कर्मणि। भूयते देवदत्तेन इति भावे। पच्यते ओदनः स्वयमेव इति कर्मकर्तरि ।

### २.१.३ उपसर्गाः

आख्यातमुपगृह्य तस्यैव अर्थविशेषं सृजन्तीत्युपसर्गाः प्रादयः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप इति द्वाविंशतिः उपसर्गाः परिगणिताः । शाकटायनमते उपसर्गाणां स्वीयमर्थं नास्ति अपि तु नामाख्यातयोरेव योऽर्थः कर्मक्रियारूपः तत्रैव विशेषं कञ्चिदुपसंयुज्य व्यञ्जयन्ति। तस्मात् पृथग्व्यवस्थिता उपसर्गा अनर्थका भवन्ति। किन्तु गार्ग्याचार्यमते नामाख्याताभ्यां वियुक्तानामपि उपसर्गाणाम् अनेके अर्थाः भवन्त्येव। अतः इदं कथनमयुक्तमस्ति यत् पृथग् स्थिताः उपसर्गाः अनर्थकाः भवन्ति। उपसर्गाणामर्थान् दर्शयन्नाह यास्काचार्यः- आ इत्यर्वागर्थे। प्र परा इत्येतयोः प्रातिलोम्यम्। अभि इत्याभिमुख्यम्। प्रति इत्येतस्य प्रातिलोम्यम्। अति सु इत्यभिपूजितार्थे। निर्दुरित्येतयोः प्रातिलोम्यम्। नि अव इति विनिग्रहार्थीयौ। उदित्येतयोः प्रातिलोम्यम्। सम् इत्येकीभावम्। वि अप इत्येतयोः प्रातिलोम्यम्। अनु इति सादृश्यापरभावम्। अपीति संसर्गम्। उप इत्युपयजनम्। परि इति सर्वतोभावम्। अधि इति उपरिभावमैश्वर्यं वा।

## २.१.४ निपाताः

उच्चावचेषु अर्थेषु निपतन्ति इति निपाताः। इमे निपाताः त्रिविधा भवन्ति- उपमार्थकाः कर्मोपसंग्रहर्थकाः पदपूरणार्थकाश्चेति। उपमार्थका निपाताः चत्वारः सन्ति- इव न चित् नु चेति। तत्र न इति निपातः लौकिकभाषायां निषेधार्थको भवति, परन्तु वैदिकभाषायां निषेधार्थक उपमार्थक इत्युभयविधो भवति। इव तु सर्वत्र उपमार्थक एव अस्ति। चित् इति निपातः अनेकार्थको वर्तते। यथा- 'आचार्यश्चिदिदं ब्रूयात्' इति पूजायाम्। 'दधिचित्' इत्यत्र उपमार्थे वर्तते। 'कुल्माषांश्चिदाहर' इति अवकुत्सितार्थे वर्तते। नु इत्यस्यापि नैके अर्थाः भवन्ति। च वा ह उ इत्यादयः कर्मोपसंग्रहार्थकाः निपाताः भवन्ति। पदपूरणार्थकाः निपाताः यथा कम् ईम् इत् उ इत्येते। एते च पदपूरणार्थकाः निपाताः अनर्थकाः भवन्ति।

महाभाष्यकाराः अपि पदानां चतुर्भेदत्वं स्वीकुर्वन्ति। महाभाष्यस्य पस्पशाह्निके व्याकरणस्य गौणप्रयोजनेषु भगवता पतञ्जलिना ऋग्वेदसंहितायाः एकं मन्त्रमुल्लिखितम्-

> चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
> त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश॥
>
> (ऋग्वेदसंहिता ४.५८.०३) इति।

मन्त्रेऽस्मिन् चत्वारि शृङ्गा इत्यस्य चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च इति व्याख्यां कृतवान् । श्रीमद्भर्तृहरिणा वाक्यपदीयस्य पदकाण्डे उक्तम्-

> द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।
> अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्॥
>
> (वाक्यपदीयम् ०३.०१.०१) इति।

पदेषु यथा प्रकृतिप्रत्ययादिकल्पनं क्रियते अयं प्रकृतिभागः अयं प्रत्ययभाग इति तद्वत् आचार्यैः वाक्येषु अपि पदानां कल्पनद्वारा कैश्चित् पदस्य द्वैविध्यं स्वीकृतं, कैश्चित् चतुर्धा पञ्चधा च स्वीकृतम्। ये पदानां द्वैविध्यं स्वीकुर्वन्ति तेषां मते नाम सुबन्तं वा, आख्यातम् तिङन्तं वेति द्विविधं पदम्। उपसर्गकर्मप्रवचनीययोः अन्तर्भावस्तु आख्याते एव भवति द्वयोरपि क्रियागतवैशिष्ट्यस्य द्योतकत्वात्। हिरुक् इत्यदीनि यानि क्रियावाचीनि अव्ययानि सन्ति तेषामपि अन्तर्भावः आख्याते एव भवति। एवञ्च निपातानां सत्त्वप्रधानस्वराणाञ्च नामपदे अन्तर्भावो भवति। चतुर्भेदात्मकं पदविभागं स्वीकर्तॄणाम् आचार्याणां मतमस्ति यद् नामाख्यातोपसर्गनिपाताः इति चत्वारो

भेदा भवन्ति पदस्य। नाम इत्यस्य सुबन्तम् आख्यातम् इत्यस्य तिङन्तमिति नामान्तरम्। तत्र सुबन्तं तिङन्तञ्च साक्षाद् अर्थवाचके भवतः। उपसर्गस्तु आख्यातगतवेशेषार्थस्य द्योतको वर्तते। निपातश्च सुबन्तगतविशेषार्थस्य द्योतको भवति। तस्मात् एतेषां मते पदं चतुर्विधं भवतीति।

केषाञ्चन मते पदं पञ्चविधं भवति- सुबन्तं तिङन्तम् उपसर्गः निपातः कर्मप्रवचनीयश्चेति। तत्र कर्मप्रवचनीय उपसर्ग इव साक्षात् क्रियाविशेषस्य प्रकाशको न भवति, तस्मात् उपसर्गे तस्य अन्तर्भावं कर्तुं न शक्यते। यथा 'शाकल्यस्य संहितामनु प्रावर्षत्' इति वाक्ये 'अनु' इति कर्मप्रवचनीयो वर्तते। संहिताश्रवणपूर्वकत्वरूप्रवर्षणक्रियागतविशेषार्थः अनु इत्यनेन साक्षाद् द्योत्यो वर्तते। अत्र निषमनक्रियायाः श्रवणं नास्ति परन्तु संहिताप्रावर्षणयोः हेतुहेतुमद्भावद्योतनपुरःसरं निशमनं द्योत्यमस्ति। अतः क्रियाविशेषस्य प्रकाशके उपसर्गे कर्मप्रवचनीयस्य अन्तर्भावो न भवति। अतः पदस्य पञ्चप्रकारकत्वं सिध्यति इत्येतेषामाशयः।

### ३. न्यायशास्त्रे पदम्

किं नाम पदमित्यत्र नव्यनैयायिकाः वदन्ति 'शक्तं पद' इति। वाचकतासम्बन्धेन निरूपकतासम्बन्धेन वा शक्तिविशिष्टं पदम् इत्यर्थः। का नाम शक्तिः इति चेदुक्तम् अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारा, इदं पदमिममर्थं बोधयतु इत्याकारा वा ईश्वरेच्छा शक्तिः। यथा गोशब्दाद् सास्नालाङ्गुलादिमत्पिण्डरूपोऽर्थो बोद्धव्य अथवा गोशब्दोऽयं सास्नादिमत्पिण्डरूपम् अर्थं बोधयतु इति या ईश्वरेच्छा वर्तते सैव शक्तिरित्युच्यते। गोशब्दे च सा शक्तिः वर्तते अतः शक्तिविशिष्टत्वात् शक्तत्वाद् वा गौः इति पदं भवति। ननु यदीश्वरेच्छा एव शक्तिः तर्हि पुत्रादौ पित्रादिकल्पितेषु चैत्रादिपदेषु शक्तिर्न स्यात्, तत्र ईश्वरेच्छाया अभावादिति। अस्याः शङ्कायाः समाधानमुक्तं न्यायसिद्धान्तमुक्तावल्यां श्रीविश्वनाथपञ्चाननभट्टाचार्येण आधुनिके नाम्नि शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्वात्। एकादशाहकालीनपित्रुच्चारणविषयनामत्वेन सामान्यरूपेण ईश्वरेच्छारूपा शक्तिरस्त्येवेति चित्राद्याधुनिकानां नाम्नां पदत्वं सिध्यति। आधुनिकसङ्केतमात्रे नदीवृद्ध्यादिपदे डित्थादिपदे च न ईश्वरेच्छारूपा शक्तिः किन्तु सा 'यदृच्छारूपा' इति साम्प्रदायिकाः। एतदाशयेनैव शक्तिवादे 'आधुनिकसङ्केतः परिभाषा तया चार्थबोधकं पदं पारिभाषिकम्' इत्याद्युक्तमिति तदेकदेशीयमायाति। नव्यास्तु ईश्वरेच्छा न शक्तिः किन्तु इच्छैव। तेन आधुनिकसङ्केतेऽपि शक्तिरस्त्येवेत्याहुः। अयमाशयः यदीश्वरेच्छारूपैव शक्तिः तर्हि आधुनिकपाणिन्यादिमुनिना 'यूस्त्र्याख्यौ

नदी' (अष्टाध्यायी १.४.३) इत्यादिरूपेण सङ्केतितात् नद्यादिपदाच्छाब्दबोधो न स्यात्। तस्माद् इच्छात्वेन रूपेण शक्तित्वं स्वीकार्यम्, तत्क्वचिद् ईश्वरेच्छारूपम् क्वचिदनीश्वरेच्छारूपमिति सर्वसङ्ग्रहः। एवञ्च आधुनिकानां चैत्रमैत्रडित्थादिशब्दानामपि शक्तत्वात् तेषां पदत्वं सिध्यति तेभ्यः शाब्दबोधश्च जायते।

### ३.१. शाब्दबोधे पदस्योपयोगिता

वाक्यार्थज्ञानं शाब्दबोध इत्युच्यते। वाक्यार्थज्ञानाय तत्र स्थितानां पदानाम् पदार्थानाञ्च ज्ञानम् अत्यावश्यकं भवति। शाब्दबोधे पदज्ञानं करणं भवति, उक्तञ्च न्यायसिद्धान्तमुक्तावल्याम्-

पदज्ञानं तु करण द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥

(न्यायसिद्धान्तमुक्तावली, कारिका ८१) इति।

अर्थात् शाब्दबोधे पदज्ञानं करणं भवति, पदार्थज्ञानं व्यापारो भवति शक्तिज्ञानञ्च सहकारि कारणं भवतीति। समुदितपदेभ्यो यो वाक्यार्थबोधो जायते सैव शाब्दबोध इत्युच्यते। स च वाक्यार्थबोधः पदज्ञानं विना नैव सम्भवति, पदज्ञानाभावे पदार्थज्ञानस्य उपस्थित्यभावादिति। तस्माद् पदज्ञानं करणमित्युच्यते। यथा 'गामानय त्वम्' इति वाक्यं श्रुतवतः ज्ञातपदपदार्थसम्बन्धस्य पुरुषस्य तत्तत्पदश्रवणात् तत्तदर्थोपस्थितौ 'गोकर्मकानयननुकूलकृतिमांस्त्वम्' इत्याकारः शाब्दबोधो जायते। यः पुरुषः गोपदमेव न जानाति तस्य पदज्ञानाभावात् पदार्थज्ञानाभावेन वाक्यार्थज्ञानं नोत्पद्यते, अतः गामनय त्वम् इति वाक्यश्रवणेऽपि तस्मात् शाब्दबोधो न भवति। तस्मात् पदज्ञानं विना शाब्दबोधो नैव सम्भवति।

### ३.२. न्यायशास्त्रे पदभेदाः

न्यायनये पदं मुख्यतः द्विविधं भवति मुख्यं गौणं चेति। यच्छक्तिवृत्त्या यमर्थमुपस्थापयति तत्तस्मिन्नर्थे मुख्यम्। यथा गोघटादिव्यक्त्युपस्थापकं गोघटादिपदम्। मुख्यमपि चतुर्विधं- यौगिकं रूढं योगरूढं यौगिकरूढं चेति। तत्राद्यं पाचकादिपदम्। द्वितीयं ब्राह्मणवाचकं विप्रपदं गोमण्डादिपदञ्च। तृतीयं पङ्कजादिपदम्। चतुर्थम् उद्भिदादिपदम्। यल्लक्षणावृत्त्या यमर्थमुपस्थापयति तत्तस्मिन्नर्थे गौणं लाक्षणिकं वा इत्युच्यते। यथा गङ्गायां घोष इत्यत्र लक्षणावृत्त्या तीरोपस्थापकं गङ्गापदम्। एतेषां पदभेदानां वर्णनं सोदाहरणेन आलोच्यते।

### ३.२.१. यौगिकम्

यत्र अवयवार्थ एव बुध्यते तद्यौगिकमित्युच्यते। यस्मिन् पदे अवयवप्रतिपाद्यार्थः

प्रमितिविषयवान् भवति तद् यौगिकं पदम् इत्याख्यते। अर्थात् अवयवेन उपस्थापितानाम् अर्थानां प्राधान्यं यत्र भवतीति। यथा- पाचकादिपदम्। पच्-धातोः ण्वुल्-प्रत्यये पाचकः इति पदं निष्पद्यते। पाचकः इति पदे पच् इत्येकः प्रकृतिरूपोऽवयवः। ण्वुल् इत्येकः प्रत्ययरूपोऽवयवो वर्तते। पच्-धातोरर्थः पाक इति, ण्वुल्-प्रत्ययस्यार्थो भवति कर्ता, 'ण्वुल्तृचौ' (अष्टाध्यायी ३.१.१३३) इति सूत्रेण कर्त्रर्थे ण्वुल्-प्रत्ययस्य विधानात्। एवमुभयावयवार्थः पाककर्ता इति बुध्यते। योगशक्त्या पाचकपदात् पाककर्ता इत्यर्थस्य बोधाद् इदं यौगिकपदमित्युच्यते। एवञ्च संस्कृतवाङ्मये यानि पदानि अवयवार्थप्रतिपादकानि वर्तन्ते तानि यौगिकपदानि इत्युच्यन्ते।

### ३.२.२. रूढम्

यत्र अवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण अर्थो बुध्यते तद् रूढम्। यस्मिन् पदे अवयवशक्तिं विनापि समुदायशक्त्या अर्थबोधो जायते तद् रूढपदम् इत्युच्यते। यथा- गोमण्डलादिपदम्। गोपदस्य प्रकृतिप्रत्ययसमुदायरूपस्य गोत्वजातौ शक्तिरस्ति। 'गमेर्डोः' (उणादिसूत्रम् २.६८) इति उणादिसूत्रेण गम्-धातोः डो-प्रत्ययेन गोपदनिष्पत्तेः गमनकर्तृत्वरूपावयवार्थे सत्यपि नात्र गच्छतीति गौः इत्येवम् अवयवार्थः स्वीक्रियते, अपि तु समुदायशक्त्या गोत्वविशिष्टपिण्ड एव स्वीक्रियते। एवं मण्डलपदमपि मण्डं लाति इत्येवमवयवार्थे न शक्तम् किन्तु अवयवशक्तिनैरपेक्ष्येण समुदायशक्त्या सूर्यादिरोधके कुण्डलाकारे परिधौ शक्तम्। अतः गोमण्डलादिपदं रूढपदं भवति।

### ३.२.३. योगरूढम्

रूढपदञ्च विहाय योगरूढम् इत्यपि अपरं पदं वर्तते। तत् किम् इत्युक्तं न्यायसिद्धान्तमुक्तावल्यां यत्र तु अवयवशक्तविषये समुदयाशक्तिरप्यस्ति तद्योगरूढम् इति। अर्थात् यस्मिन् पदे अवयवशक्तिसहकृतसमुदाय-शक्त्या अर्थबोधो जायते तादृशं पदं योगरूढम् इत्याख्यायते। यथा- पङ्कजादिपदम्। पङ्कजम् इति पदं पङ्के जायते यः इत्येवं व्युत्पत्त्या पङ्कोपपदाद् जन्-धातोः 'सप्तम्यां जनेर्डः' (अष्टाध्यायी ३.२.९७) इति सूत्रेण डप्रत्यये कृते निष्पन्नं भवति। एवञ्च पङ्कजपदम् अवयवशक्त्या पङ्कजनिकर्तृत्वरूपमर्थं बोधयति। समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। पङ्कजपदेन अवयवार्थसहकृतसमुदायशक्त्या पद्मार्थस्य बोधाद् इदं योगरूढं भवति। ननु पङ्कजपदाद् केवलया अवयवशक्त्या एव कुमुदस्य बोधः स्याद् रूढिशक्तेः प्रयोजनं किमर्थमिति प्रश्नो भवति। तस्य समाधानमुक्तं समुदायार्थावयवार्थोभयविधस्थले केवलावयवार्थं प्रति रूढिः प्रतिबन्धिका भवति। तस्मात् पङ्कजपदं नावयवशक्त्या कुमुदे रात्रिविकशिनि

पद्मविशेषे शक्तं किन्तु अवयवशक्तौ सत्यामपि समुदायशक्तिबलाद् पद्म एव शक्तम्। अतः योगरूढमिदम्।

### ३.२.४. यौगिकरूढम्

यौगिकरूढयोगरूढेभ्यो भिन्नं यौगिकरूढम् इत्यपि अपरं पदं भवति। यत्र अवयवार्थरूढ्यर्थयोः स्वान्तन्त्र्येण योधस्तद् यौगिकरूढम् इति। यादृशपदनिरूपितावयवशक्त्याश्रयस्य यादृशपदनिरूपितरूढिशक्त्याश्रायस्य च स्वातन्त्र्येण अर्थान्तरमविषयीकृत्य योगः तद् पदं नाम यौगिकरूढमिति। अर्थात् एकस्मादेव पदाद् एकदा अवयवार्थो बुध्यते एकदा समुदायार्थश्च बुध्यते। स्वातन्त्र्येण इत्यस्यायमाशयः यदा अवयवार्थो बुध्यते तदा समुदायार्थस्य योगो न भवति, यदा च समुदायार्थो बुध्यते तदा अवयवार्थस्य बोधो न भवतीति। यौगिकरूढस्य उदाहरणं यथा उद्भिदादिपदम्। ऊर्ध्वं भिनत्ति इति व्युत्पत्तेः अवयवशक्त्या उद्भित्पदस्य तरुगुल्मादिरूपोऽर्थो भवति। समुदायशक्त्या च यागविशेषस्य बोधो जायते। 'उद्भिदा यजेत पशुकाम' इत्यादिश्रुतिवाक्यानां विधानमस्ति वेदे। लोके उद्भिदिति पदश्रवणेन अवयवशक्त्या केवलं तरुगुल्मादीनामेव बोधो जायते। परन्तु 'उद्भिदा यजेत पशुकाम' इत्यादिश्रुतिवाक्येन तु समुदायशक्त्या उद्भिदयागस्यैव बोधो भवति। एतदेव स्वातन्त्र्येण योग इत्स्याशयः।

## ४. अलङ्कारशास्त्रे पदम्

साहित्यदर्पणकारः विश्वनाथकविराजः पदस्य लक्षणमुक्तवान्- 'वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः' इति। प्रयोगयोग्याः अन्वयाभावविशिष्टाः एकार्थबोधकाः वर्णाः पदम् इत्युच्यते। यथा घटः इत्येकं पदम्। घटः इति वर्णसमुदायः प्रयोगार्हो वर्तते व्याकरणादिना शुद्धरूपत्वात् वाक्ये प्रयोक्तुं शक्यते। पदार्थान्तरेण सह असम्बद्धत्वाद् अनन्वितो वर्तते। कम्बुग्रीवादिमत्पिण्डरूपं कञ्चिद् एकार्थं बोधयति अतः एकार्थबोधकोऽपि वर्तते तस्मात् घटः इति वर्णसमुदायः पदम् इत्युच्यते। पदलक्षणे प्रयोगार्ह इति पदस्य किं तात्पर्यमिति चेदुच्यते व्याकरणादिना प्रयोगसाधुत्वे सत्येव तस्य वर्णसमुदायस्य पदत्वं सिध्यति। प्रयोगार्ह इति पदेन प्रातिपदिकस्य व्यावृत्तिर्भवति। यस्माच्छब्दाद् विभक्तेः प्रयोगो न जातः तत् शब्दस्वरूपं प्रातिपदिकम् इत्यभिधीयते। 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (अष्टाध्यायी १.२.४५) इति व्याकरणसूत्रेण प्रातिपदिकसंज्ञा विधीयते। तदनुसारेण धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्तञ्च भिन्नम् अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं भवति। सुप्तिङ्-प्रत्यययोः 'विभक्तिश्च' (अष्टाध्यायी १.४.१०४) इति सूत्रेण विभक्तिसंज्ञा विहिता। अतः विभक्तिशब्देन

सुप्-प्रत्ययस्य तिङ्-प्रत्ययस्य च बोधो जायते। एवञ्च यस्मात् शब्दात् सुप्-विभक्तेः तिङ्-विभक्तेः वा योगो न जातः तत् प्रातिपदिकम् भवति। विभक्तिरहितं शब्दस्य मूलरूपमेव प्रातिपदिकमित्यर्थः। केवलस्य प्रातिपदिकस्य च प्रयोगयोग्यत्वं न भवति। महाभाष्यकारेण पतञ्जलिना उक्तम्- 'नापि केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः' इति। अतः प्रातिपदिकमात्रस्य विभक्त्यन्ताभावात् वाक्ये प्रयोगानर्हत्वाद् एकार्थबोधकत्वेऽपि तस्य पदसंज्ञा न भवति। तस्माद् घट इति प्रातिपदिकं पदं न भवति अपि तु सुप्प्रत्ययान्तस्य घटः इत्यस्यैव पदसंज्ञा भवति।

'वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः' इति लक्षणे अनन्वित इति पदस्य किं तात्पर्यमिति चेदुच्यते अनेन वाक्यमहावाक्ययोः व्यावृत्तिर्जायते। अनन्वितपदेन वाक्ये महावाक्ये च पदलक्षणस्य अतिव्याप्तिः न भवति। साहित्यदर्पणे वाक्यलक्षणमुक्तं 'वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' इति। महावाक्यस्य लक्षणमुक्तं- 'वाक्योच्चयो महावाक्यम्' इति। 'शून्यं वासगृहं विलोक्य...' इत्यादिवाक्ये रामायणमहाभारतरघुवंशादिमहावाक्ये च अन्वितार्थस्य बोधो जायते। एवञ्च वाक्यमहावाक्याभ्याम् अन्वितार्थस्य बोधात् तत्र अतिव्याप्तिर्वारणाय लक्षणे अनन्वित इत्युक्तम्। एतेन अनन्वितार्थस्य असम्बद्धार्थस्य वर्णसमुदायस्यैव पदसंज्ञा भवति।

लक्षणे एक इति पदेन साकाङ्क्षाणाम् अनेकपदानाम् अनेकवाक्यानाञ्च व्यावर्तनं भवति। अर्थबोधक इति कथनेन निरर्थकानां कचटतपादीनां वर्णानां व्यावृत्तिः जाता। 'अर्थ' इति पदाभावे तस्य विशेषणद्वयम् 'अनन्वितः' 'एकः' इत्यनयोरपि त्यागः कर्तव्यः। तथा सति प्रयोगार्हा वर्णाः पदम् इति लक्षणस्वरूपं स्यात्। तदा क च ट इत्यादिवर्णेषु अतिव्याप्तिः भवेत्, तेषां प्रयोगयोग्यत्वात्। प्रयोगार्हत्वं वर्णेषु एव तिष्ठति न तु अर्थे। एतद्दोषवारणाय अर्थ इति पदोपादानम्। वर्णाः इत्यत्र बहुवचनम् अविवक्षितं, यतो हि एकस्यापि वर्णस्य पदसंज्ञा भवति। अतः एकस्य वर्णस्य ततोधिकानां वर्णानां वा पदसंज्ञा विधीयते। एकवर्णात्मकं पदं यथा- अः, खः इत्यादिः। अः इति विष्णुपर्यायवाची वर्तते, खः इति आकाशपर्यायवाची वर्तते।

उक्तपदलक्षणे अर्थ इति पदमागतम्। तत्र केषामार्थानां बोधका वर्णाः पदसंज्ञं भवति इति प्रश्ने उक्तं- 'अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः' इति। अर्थः त्रिप्रकारको भवति वाच्यार्थः लक्ष्यार्थः व्यङ्ग्यार्थश्चेति। एतेषाम् अर्थानां बोधकः वर्णसमुदायः पदम् इत्युच्यते। एतस्य त्रिविधस्य अर्थस्य लक्षणमुक्तं विश्वनाथकविराजेन-

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।

व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥ [३] इति।

एतेषाम् अर्थानां बोधकः वर्णसमुदायः पदमित्याशयः। अभिधावृत्त्या मुख्यार्थस्य शक्यार्थस्य वा येन पदेन बोधो जायते तत् वाचकं पदम् इत्युच्यते। यथा गौः इति पदेन अभिधावृत्त्या गोत्वजातिविशिष्टगोरूपमुख्यार्थस्य बोधो जायते अतः गौः इति वाचकं पदं भवति। मुख्यार्थस्य अन्वयानुपपत्त्या लक्षणावृत्त्या यत्र लक्ष्यार्थो बुध्यते तत् लाक्षणिकं पदमिति वदन्ति आलङ्कारिकाः। यथा गङ्गायां घोषः इति वाक्ये गङ्गापदं तीररूपलक्ष्यार्थस्य बोधनात् इदं लाक्षणिकं पदं भवतीति शम्।

## परिशीलितग्रन्थसूची

१. *व्युत्पत्तिवादः*; श्रीगदाधरभट्टाचार्यः; विपदभञ्जनपालः (सम्पादकः); नवदेहली- राष्ट्रियसंस्कृतसंस्थानम्।; २०११।

२. *व्युत्पत्तिवादः*; श्रीगदाधरभट्टाचार्यः; हरेरामत्रिपाठी (सम्पादकः); नवदेहली- राष्ट्रियसंस्कृतसंस्थानम्; २०११ (प्रथमसंस्करणम्)।

३. *व्युत्पत्तिवादः*; श्रीगदाधरभट्टाचार्यः; ज्वालाप्रसादगौडः (सम्पादकः); वाराणसी- चौखम्बा विद्याभवन; २०१०।

४. *तर्कसंग्रहः*; श्रीमदन्नम्भट्टः; बालशास्त्री(सम्पादकः); वाराणसी- चौखम्बा सुरभारती प्रकाशन; २००८।

५. *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः); भट्टोजिदीक्षितः; दिल्ली- मोतीलाल बनारसीदास; १९६१(प्रथमसंस्करणम्)।

✶ ✶ ✶

[३] साहित्यदर्पणस्य द्वितीयपरिच्छेदे, पृष्ठम् २६

# गीताञ्जल्यनुवादेषु विजयसारथिवैभवम्

**डा.गोपीकृष्णन् रघुः***

**उपोद्घातः**

कवीन्द्रः रवीन्द्रनाथः शाश्वतभारतीयसंस्कृतेः प्रमूर्ती विग्रह इति। नवनवोन्मेषशालिनी या किल सारस्वतीप्रज्ञा, तस्या लोकोत्तरप्रतिभावाः रवीन्द्रनाथ एव यथार्थाधिकारी प्रतिभायाश्चैतस्याः विकाशे संस्कृतभाषायाः सीमरहितमवदाने सर्वैरङ्गीक्रियते। संस्कृतसाहित्यस्य सरसभूमावेव प्रोथितमस्ति रवीन्द्रसाहित्यरूपिं कल्पवृक्षमूलम्। महर्षेः पितुः शिक्षया दीक्षया तदीयकैशोरं चित्तमुपनिषदां भावादर्शन जीवनप्रभातमेव समुद्बुद्धमासीत्। द्विजेन्द्रनाथः सत्येन्द्रनाथः ज्योतिरिन्द्रनाथः इत्यादीनां प्रमुखाणां महामनस्विनामग्रजानामकुण्ठसंस्कृतसाहित्यज्ञानेन च तरुणे वयस्येवायं नितरां प्रभावितः आसीत्। तस्य सुदीर्घजीवनयात्रायां कर्मसाधनायां ज्ञानसाधनायाञ्चालक्ष्यते संस्कृतवाङ्मयस्य घनिष्ठः संयोगः। नवदशशतके यद्यपि तस्याविर्भावस्तथापि संस्कृतसाहित्यस्य वैदिके पौराणिके च युगे सञ्चरति स्म तदीयसौन्दर्यसन्धायि कविचित्तम्। भावादर्शेन कविवरोऽयं वैदिकानामृषीणां सगोत्रः रूपकल्पनेन च संस्कृतपौराणिककवीनां स खलु सतीर्थ्यः। उपनिषदोऽध्यात्मसम्पन्निचयेन, रामायणमहाभारतयोः समुदारचरित्रचित्रणेन, अमरुभर्तृहरिप्रमुखाणां सुकुमारशृङ्गारसज्जया, कादम्बरीहर्षचरितयोः प्रसन्नगम्भीररचनाशैल्या तथाखिलसंस्कृतसाहित्यस्योदात्तमहिम्ना, मधुरसौकुमार्येण च स खलु चिरमेव मुग्धः प्रवुद्धश्चासीत्। किमधिकं तदीयगद्यपद्यानां वाक्यविन्यासः प्रायशस्तेन सह कालिदासस्य निविडं परिचयमावहति।

रवीन्द्रकाव्यानामयं विशेषो यद् द्राक्षारसस्पर्धिनी कोमला मधुरा च पदरचना, पठनसमनन्तरमेव झटिति परिस्फुरन् बाह्यश्चार्थः च आभ्यन्तरार्थपरिशीलनं विनापि सहृदयचित्तमावर्जयितुं शक्नुतः। आभ्यन्तरार्थास्वादनाय रवीन्द्रनाथस्याध्यात्मिकविचारधारामार्गः किचिदनुसर्तव्योऽस्माभिः। रवीन्द्रनाथेनोररीकृतः आध्यात्मिकसिद्धान्तो न कोऽपि नवीनः सिद्धान्तः। कवीन्द्रेणानेन शङ्कररामानुजादीनामस्मत्पूर्वाचार्याणामेवाध्यात्मिकसिद्धान्ताः प्रचारिताः। तदर्थं तेन पूर्वम् अधिगता नातिप्रसिद्धा विशिष्टा काव्यशैली

---

* सहायकाध्यापकः, संस्कृत-दर्शनविभागे,
रामकृष्णमिशन् विवेकानन्द-शैक्षणिक-शोधसंस्थाने,

काचनाविष्कृता, या च छायावादः रहस्यवादः इत्यभिधाभ्यां प्रथिताभूत्। औपनिषदिकोऽद्वैतसिद्धान्तः, वङ्गदेशे जातबहुलप्रचारो वैष्णवसिद्धान्तः, बाउल इति प्रसिद्धानाञ्च केषाञ्चन वङ्गदेशीयानामात्मचिन्तकानां विचाररीतिः चैव रवीन्द्रनाथेन युगपदङ्गीकृता इति तदीयग्रन्थपाठकानां सहृदयानाम् मतम्। तेषु दिनेषु आकुमारीकातो हिमालयं यावत् सर्वत्र भारते व्याप्ता मुक्तेरिच्छा सुस्पष्टं प्रतीयते रवीन्द्ररचनासु। रवीन्द्रनाथस्य जनको 'ईशावास्यमिदं सर्वम्' इति ईशोपनिषदो मन्त्रं पठित्वा तन्मन्त्रार्थमनन च काञ्चिदखण्डब्रह्मानुभूतिं लब्ध्वा ऐहिकभोगबहुला जीवनसरणीं परित्यज्य महर्षिवृत्त्या जीवनं यापितवान्। तादृश्येवानुभूतिः कविनानेनोपलब्धेति तेन तत्र तत्र स्वीयकाव्येषु वर्णितम्।

## गीताञ्जलिः

रवीन्द्रनाथेन प्रणीतो 'गीताञ्जलिः' समग्रे प्रपञ्चे प्रसिद्धिं प्राप्तोऽस्ति, यतः तस्यै गीताञ्जलिकृत्यै एव रवीन्द्रनाथो नोबेलपुरस्कारेण सभाजितोऽभवत्। इदमवधेयं यत्- गीताञ्जलिः वङ्गभाषया लिखितः कश्चन काव्यसङ्ग्रहोऽस्ति। गीताञ्जलेरनुवाद एव 'नोवेल' प्रशस्तये चितः सम्मानितश्च। न तु मूलभाषया लिखितो ग्रन्थः। वङ्गीयगीताञ्जलेः प्रथमप्रकाशनं १९१० क्रिस्तवर्षेऽभूत्। 'गीतांजलि : सॉन्ग ऑफ़रिंग्स' इति नाम्ना वङ्गीयगीताञ्जलेः ५३ गीतानि तथा ५० नैवेद्यम्, शिशुः, खेया, गीतिमाल्यम्, चैतालिः, कल्पना, स्मरणम्, उत्सर्गः, अचलायतनम् इत्येतेभ्यः कविकृतकाव्यसङ्ग्रहेभ्यः काश्चन कविताः सङ्गृह्य गीताञ्जलेराङ्ग्लानुवादो रवीन्द्रनाथेनैव कृतः। अनन्तरं तस्यानुवादकर्मणः परिष्कारं विधाय १ नवंबर १९१२ वर्षे इंडियन सोसायटी ऑफ़ लंदन द्वारा प्रकाशितम्।

## गीताञ्जलिवैशिष्ट्यम्

अधिगताद्वैतब्रह्मतत्त्वोऽप्ययं कविर्वङ्गदेशे तदानीन्तनकाले प्राप्तप्रचारां वैष्णवरीतिमेव प्रधानतया आविष्करोति गीताञ्जलौ। वैष्णवसिद्धान्तानुसारमविरता भगवत्प्रेमरूपा भक्तिरेवैकं साधनं मोक्षमार्गस्येति। तस्याः भक्तेरेव रमणीयतरः कश्चन परिणामविशेषो हि मधुरभक्तिः, उज्ज्वलभक्तिः वेति निगद्यते। येन भक्तिभावेन खलु जीवः प्रियसमागमोत्कण्ठितप्रेयसीवत् भगवत्सन्निधिलालसाकुलितमनाः सततं विरहेण तप्यते। भगवान् प्रियः, जीवश्च प्रेयसी। इदमेव स्वाभाविकम् अकृत्रिमं बाह्योपचाररहितं नैसर्गिकं प्रेम जीवः परमात्मा इत्यनयोरविरतं सम्बन्धमातनोति। जीवात्मना प्रेयस्या समं मेलितुमिच्छुरेव प्रियः परमात्मा खलु सन्तापितो भवति। मातृरूपेण, पितृरूपेण, वन्धुरूपेण, स्वामिरूपेण चास्य परमात्मनः उल्लेखनं लोके प्रसिद्धमेव। इत्थमेव

भावना प्रतिपदं प्राप्यते रवीन्द्रसाहित्ये। कवीरः, नानकः, दादूः, वाउल्सम्प्रदायः इत्यादीनां मतानि स्पष्टरूपेण प्रतिफलितानि रवीन्द्रवाङ्मये। कविरयं कवीरेण नितरां प्रभावित आसीत्। अतस्तेन कवीरस्य शतं पद्यानि वङ्गगिरानूदितानि। कवीरेणोक्तमासीत्यत् - सामान्येऽस्मिन् मनुष्यजीवने साधारणमानवे एव भगवत्प्राप्तिः कर्तुं शक्येति। भिक्षां याचमानाः अनिकेताः वाउलनामधेयाः केचन वङ्गदेशीयाः साधवः अद्वैतब्रह्मसिद्धगीतानि गायन्तः सर्वत्र सञ्चरन्ति। ते मूर्तिपूजां न कुर्वन्ति। न वा तेषां कोऽपि उपासनालयो वर्तते। तेषां मतानुसारमिदं शरीरमेव देवालयः, स एव सर्वदा परिशुद्धः करणीयः। एवमेवाचरन् जीवः स्वतः अखण्डब्रह्मसाक्षात्कारं प्राप्नोति। इत्थमेव रवीन्द्रनाथेन तत्र तत्र स्वीयकाव्येषु निरुक्तानां सिद्धान्तानां परामर्शः कृतः, आत्मसमर्पणेन, अहङ्कारवर्जनेन, निराडम्बरजीवनयापनेन च।

**गीताञ्जल्यनुवादाः**

एकस्या भाषायाः साहित्यस्य भावजातं सौन्दर्य्यञ्चाक्षुण्णं कृत्वा भाषान्तरे तस्यानुवादकरणं नातीव सुकरम्। अतश्चानुवादस्य साफल्यविधौ बहवः समीक्षकाः सन्देहपराः। तथापि एतदवश्यमेवाभ्युगन्तव्यं यद् विश्वसाहित्यसंसदि प्रवेशविधौ अनुवादस्योपयोगितावश्यमेव स्वीकर्तव्या। यतः अनुवादमन्तरेण व्यक्तिनिष्ठसीमितभाषाज्ञानद्वारा विश्वसाहित्येन सह परिचयः कदापि कस्यापि न सम्भवेत्। पक्षान्तरे भाषान्तरीकरणमन्तरेण स्वभाषायाः सीमिते परिसरे विराजमानं किमपि साहित्यं व्याप्तिं लव्धुं न शक्नोति। एतदेवानुवादसाहित्यस्योपयोगित्वम्।

प्रायेणाखिलासु भारतीयभाषासु तथा पृथिव्या अनेकासु भाषासु गीताञ्जलेरनुवादो जातः। आन्ध्रप्रदेशीयेन पुल्लेलश्रीरामचन्द्रेण तथा केरलप्रान्तीयेन एन, गोपालपिल्लाइमहाभागेन कृतेऽनुवादे गीतसङ्ख्या त्र्यधिकमेकशतम्(१०३)। एताभ्यां रवीन्द्रनाथकृत-गीताञ्जलेराङ्ग्लभाषानुवाद एवोपजीव्यत्वेन गृहीतः। रामचन्द्रेण मन्दाक्रान्तावृत्तमवलम्ब्य पिल्लाइमहाभागेन जातिच्छन्दः समाश्रित्यानुवाद विहितः। शिलचर रवीन्द्रशतवार्षिकोत्सवसमित्या प्रकाशिते कामिनीकुमाराधिकारिणा विरचिते गीताञ्जलिसंस्कृतमिति ग्रन्थे निर्वाचितानां पञ्चविंशतिसयकानां गीतानामनुवादः प्रचलितैर्विविधैः संस्कृतच्छन्दोभिः क्रियमाण आलोक्यते। १९६६ खीष्टवर्षे साहित्याकादेमीतः प्रकाशिते डा. वे. राघवेण सम्पादिते संस्कृतरवीन्द्रमिति ग्रन्थे विविधै मनीषिभिः क्रियमाणस्य गीताञ्जलेरनुवादस्य चित्रमेवं प्राप्यते। वङ्गभाषामयगीताञ्जलिगीतेषु दुर्गादासगोस्वामिना षण्णाम्, इन्द्रमोहनचक्रवर्तिना सप्तानाम्, शैलेन्द्रनाथमौलिकेन चतुर्णाम्, एस. एल्. ताम्बेमहोदयेन

द्वयोरनुवादो विहितः। आङ्ग्लगीताञ्जलिगीतेषु गणेशलक्ष्मण-अमलादिना द्वादशानाम्, त्रयोदशानाम्, उडालिसुव्वरामशास्त्रणा को.ल. व्यासरायशास्त्रिणा एकस्य, मा. कृष्ण नम्पूतिरिमहाभागेन चतुर्णामनुवादो विहितः। एतद्व्यतिरेकेण वङ्गीयगीताञ्जलेः प्रथमगीतस्य प्रणतिनिवेदनमिति नाम्नानुवादः कृतो विश्वेश्वरविद्याभूषणकाव्यतीर्थेन। अत्रत्येऽनुवादे कैश्चित् संस्कृतच्छन्दसामनुसरणं विहितम्। तद्यथा दुर्गादासगोस्वामिना वसन्ततिलक-शार्दूलविक्रीडितादीनि संस्कृतच्छन्दांसि सुब्बारामशास्त्रिणा मन्द्राकान्ता नम्पुत्तिरिणा वसन्ततिलकं समाश्रितानि। अन्यैः कैश्चित् संस्कृतच्छन्दांसि परिहृत्य स्वाधीनभावेनानुवादः सम्पादितः। श्रीमता अमरेन्द्रमोहन भट्टाचार्येण पञ्चविंशतिसङ्ख्यकानां रवीन्द्रपद्यानाम् अनुवादो विहितो गीताञ्जलिरिति नाम्ना ग्रन्थरूपेण प्रकाशितश्च।

**श्रीभाष्यं विजयसारथिवर्याणामनुवादः**

श्रीमता महामहोपाध्यायेन श्रीभाष्यं विजयसारथिमहाभागेन १०३ गीतयुक्तस्य आङ्गलगीताञ्जलिग्रन्थस्यानुवादः विहितः। नीलकण्ठमहाभागेन विरचितादुपोत्घातात् ज्ञायते यदस्य रचना १९५६ तमे वर्षे एवाभूदिति। तद्दृष्ट्या गीताञ्जलेः प्रथमः संस्कृतानुवादः अयमस्ति। अन्याः सर्वाः प्रायः १९६१ तः परमेव दृश्यते। अतः गीताञ्जल्याः प्रथमः संस्कृतानुवादः विजयसारथिवर्यस्य एव। प्रकाशनदृष्ट्या सर्वापेक्षया अर्वाचीनमपि इदमेव काव्यम्। ईदृशविलक्षणवैशिष्ट्यं प्रायः न कस्यापि काव्यस्य स्यात्।

कविताया अनुवादो मौलिककवितारचनातोऽपि दुष्कर इति अनुवादविशेषज्ञा अभिप्रयन्ति। यतो मौलिककवितायां कवेः स्वकीया अनुभूतिः अभिव्यक्ता भवति रीतिविशेषमवलम्ब्य। पक्षान्तरे अनुवादे अन्येन अभिव्यक्ताया अनुभूतेः प्रकाशः करणीयो भवति। सफलानुवादस्य कृते अनुवादकस्य भावयित्र्याः कारयित्र्याश्च प्रतिभाया विद्यमानता आवश्यकी। अनुवादको भावयित्र्या प्रतिभया भावयति तत्तद्भाषानिबद्धां कविकृतिम्, कारयित्र्या प्रतिभया च तां भाषान्तरे परिणामयति। अनुवादे यदि क्वचित् अनुवादकस्य कण्ठो लभते प्राधान्यं तर्हि मूलानुगत्यं भवति विडम्बितम्। विजयसारथिवर्यस्यानुवादे अनुवादककण्ठस्य अभाव एव लक्ष्यते। तदर्थं रवीन्द्रनाथस्य 'चित्त जेथा भयशून्य' इति प्रार्थनायाः गीताञ्जल्याः ३५ तमगीतस्य अनुवादान् विचार्यते। वङ्गभाषायाः साक्षादनुवदतः विश्वनाथभट्टाचार्यस्य अनुवादस्त्वित्थम्-

चित्तं यत्र भयान्मुक्तमुच्चैश्च राजते शिरः।
ज्ञानं मुक्तं च यत्रास्ते प्राचीराणि गृहस्य च॥
शकलीकृत्य वसुधां स्वप्राङ्गणतले सदा।

यत्र प्रकुर्वते नैनां क्षुद्रां च न च खण्डिताम्॥

यत्रोच्छसन्ति वाक्यानि हृदयोत्समुखात् सदा।
यत्र कर्मप्रवाहोऽपि स्रोतोवदनिवारितः॥

देशे देशे तथा दिक्षु विदिक्षु चैव सर्वतः।
धावत्यजत्रामसङ्ख्यां सार्थतां प्रति सर्वदा॥

आचारैर्यत्र तुच्छेश्च मरुरेतः कर्णैरिव।
विचारस्रोतसो मार्गो ग्रस्तश्च न कदाचन॥

पौरुषं न कृतं दीर्णं शतधा यत्र सर्वदा।
समुद्बोधय देशं त्वमिमं भारतसंज्ञितम् ॥

कृत्स्नचिन्तानन्दकर्मनायकस्त्वमसि स्वयम्।
स्वहस्तेनाहत्य सुदृढं स्वर्गे तत्रैव हे पितः॥

गीताञ्जलेरनुवादकेषु गोपालपिल्लै तथा च के. रामकृष्णवारियरः आङ्ग्लभाषाया अनुवादं कृतवन्तौ। उभयोः अनुवादा उदाह्रियेते, प्रथमं पिल्लेवर्यस्य

यत्र विनिर्भयमुदयति हृदयं यत्रोदात्तो मूर्धोदेति।
यत्र प्रसरति परितो ज्ञानं परं स्वातन्त्र्यविधानम्॥

सङ्कुचिताभिर्गृहभित्तिभिरपि यत्र न भिन्नं छिन्नं भुवनम्।

यत्र प्रादुःषन्ति न वाचः परमार्थस्यागाधगृहातः॥

यत्र तान्तो यत्तो बाहुः परिपूर्णत्यायाममयति।
यत्र हि युक्तेर्वाचोमय्याः नैव विनश्यति विमला॥

तटिनी प्रेतप्राचीनाचारमये मरुसैकतविस्तारे। तिमिरे सततविसृत्वरचिन्तनकर्मसु पुरतो नयसे यत्र मनस्त्वं

स्वातन्त्र्यस्य स्वर्गे तस्मिन् प्रतिबुध्येत पितर्मम राष्ट्रम्। इति।

अथ वारियरस्यानुवादः

यत्रास्ति निर्भयं चित्तमुन्नतं शीर्षकं तथा।
ज्ञानं स्वतन्त्रमेवास्ति यत्र गार्हिकभित्तिभिः॥

तनुभिर्नहि विच्छिन्नं भुवनं खण्डशस्तथा।
बहिरायाति सत्यस्य गाम्भीर्याच्छब्दसञ्चयः॥

परिपूर्णत्वमुद्दिश्य यत्राश्रान्तप्रवर्तनम्।
दीर्घीकरोति स्वभुजौ निर्मला युक्तिनिम्नगा॥

विचल्य मार्गतो यत्र निरानन्दं च निर्जनम्।
मृताचारमरु नैव गता यत्र च मानसम्॥

त्वया पुरो नीतमस्ति तादृशं चेष्टितं तथा।
चिन्तनं प्रति यत्सर्वं विशालीभूयते सदा॥

स्वातन्त्र्यस्य हि तत्स्वर्गलोकमुद्दिश्य मत्पितः।
मदीयप्रियदेशस्तु शीघ्रं जागरितो भवेत्॥

तत्रापि वारियरेण अनुष्टुवचनायां दक्षतया अनुवादः सम्यक् साधितः। किन्तु एतेषु अनुवादेषु काचित् सीमा वर्तते। एतैः वृत्तनिबद्धतया अनुवादः साधितः इत्यतः मूलकाव्यात् दूरतः तिष्ठति अनूदितं काव्यम्। विजयसारथिवर्याणामनुवादः एवम्-

यत्र नैव विभेति हृदयं यत्र मस्तकमुन्नतं स्यात्
निर्णिरोधं ज्ञानमयते, नैककुड्यैः भ्रान्तिमूलेः
खण्डशो न च कल्प्यते यत् यत्र जगदपि नीचदृष्ट्या
यत्र हार्दिकसूनृतामृतवाहिनी निस्सरति वाणी पुरुषकारो विश्वमभितः
कोटिरूपैश्श्रान्तिविरहम् पूर्णविजयाभ्युदयमेष्यति
निर्णिरोधं निर्विकारं सद्विचारझरी निरन्तरं
सत्यधाराभिश्च प्रवहति कर्मधारा कोटिशकला
कुण्ठिता न हि भवति यत्र तु मानवीयश्चिद्विकासः
पूर्णभावोदात्ततामपि विन्दते निजभारतेतन्नाकजागृतिमीश कल्पय
भारतं स्वातन्त्र्यनाका नन्दरोचिः सन्ततं कुरु॥

अत्र तैः कृतानुवादः यद्यपि आङ्गलादस्ति तथापि वङ्गभाषामूलसमीपं गच्छति इत्येव विशेषः। अन्येषामनुवादे तादृशसामीप्यं नैवानुभूयते। ते वृत्तापेक्षया भावविषये अधिकश्रद्धावन्तः इत्यतः एव इदमभवत्। तेषां पदचयनं वा लयः वा भवतु मूलकाव्यभावनां सम्यक् आवाहयति। अतः अन्यानुवादापेक्षया अत्र मूलकवेः भावना अधिकतरप्रकाशमेति।

एवमेव गानानामयमनुवादः इति कृत्वा गेययोग्यानां छन्दसां चयनं विहितमस्मिन्ननुवादे। क्वचिदेकस्मिन् छन्दसि आग्रहः एतेषां न विद्यते। प्रायः भावप्रकाशनार्थं युक्तस्य छन्दसः चयनं विहितं तैः। यथा २५ तमगीतं वसन्ततिलकछन्दसा-

श्रान्तक्षपासु च समाश्वसनैकतानो
 निक्षिप्य भारमखिलं त्वयि निर्भयोऽहं।
निश्चिन्तमद्यसुखदानधुरीणताव

कीनाङ्घ्रिमूलमधिनाथ पुनश्शयिष्ये॥
यदावसादोग्रसतेऽन्तरङ्ग-
प्रकाशमालस्यमनेकधा ते।
पूजाविधाने विमनायते वा
निर्भीतिशेषे भवदति
आयन्तघस्रकलिकारजनीद्विपट्या
सञ्छाद्य शाययसि लालनतः प्रभो ये-
नातिवेलनवरोचिरुदारजागृ-
त्यामोदमेत्य परितो जगतीं भ्रमन्ति॥

अन्ये बहवः अनुवादकाः वृत्तादिविषयेषु आग्रहवन्तः सन्तः मूलभावनायां लाघवं विदधतुः। किन्तु इमे भावाविष्कारार्थं छन्दसः नियमेष्वपि शिथिलतामकुर्वन्। अत्रैव यतिविषये नियमभङ्गः तदर्थं निदर्शनं भवति।

अनुवादकर्मणि स्वाभाविकताः परिरक्षणार्थं एतैः महान् परिश्रमः कृतः दृश्यते। एतैः गानमाधुर्यार्थं न केवलं विशिष्टे छन्दसि अनाग्रहः कृतः किन्तु क्वचित् स्वच्छनदतयाऽपि अनुवादः कृतो वर्तते- यथा ५३ तमे-

अगणिततारामणिगणघटितं रुचिरं यद्यपि तावकवलयम्
काञ्चनमणिगणमण्डितमिव यन्नानारूपैर्हल्लोभयते
मद्यमथापि स्वदते विद्युन्मयधारः परमसिरेव च ते
गारुडगरुदिव विलसति योऽस्तङ्गतमिहिरारुणिमेव विभाति
जीवनशेषविजागरणमहावेदने वयः कम्पतेतरां
स्थितमपि तत्तन्निखिलं नितरां भस्मीकुर्वन् यस्त्वनिमेषम्
तीक्ष्णभीषणचेतनमहसा तरवारस्ते प्रोज्ज्वलतितराम
अगणितताराममणिगणघटितं रुचिरं यद्यपि तावकवलयम्
तस्मादपि तव महसा महता निरमाय्यसिरयमयिपविपाणे।

एतेषां पदचयनं अत्यन्तं सरलं तथापि भाववाहनसमर्थमस्ति। पूर्वेषूदाहरणेषु स्पष्टतया लक्ष्यते। तत्र अत्यन्तसरलैः पदैः गभीरामपि भावनां सरसतया तैः प्रकाश्यते। पदचयनकाले तेषां श्रद्धा भावाविष्करणे एव वर्तते न तु छन्दोनियमादिषु। अतः ते सरलान् सरसान् च शब्दानादाय सहजतया अनुवादं कृतवन्तः, सहृदयहृदयमपि प्रोल्लसितवन्तः। सरसानां सरलानां शब्दानां चयनेन कथं चित्तापहमनुवादं कर्तुं शक्नुवन्ति इत्यत्र निदर्शनं यथा- ५०तमे गाने-

ग्रामवीथिषु सुचिरमचरं द्वारि भिक्षां द्वारि चाहं
स्वप्नदिव्यं कनकखचितं रथमपश्यं दूरतोऽहं

सार्वभौमः कोन्वसाविति तदनु चकितस्त्रतिष्ठत्
क्षिप्तमाप्तं रजसि कनकं शोकनाशायैव भिक्षाम्।

एवं बहुविधैः वैशिष्टैः परिपूर्णमस्ति श्रीभाष्यं विजयसारथिवर्यस्य गीताञ्जलेः अनुवादः इति वयं निश्चप्रचं वक्तुं शक्नुमः। तदीयाध्ययनं अवश्यमेव सहृदयहृदयान् रसानन्दे मज्जयिष्यतीत्यत्र नास्ति संशयलेशोऽपि। तद्रसास्वादनाय भाग्यं प्राप्तमात्मानमहं धन्यं मन्ये।

## परिशीलितग्रन्थसूची

१. *संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्*; वनमाली-बिस्वालः (सम्पादकः); नारायणदासः; नवदेहली- मान्यताप्रकाशनम्; २०१३।

२. *गीताञ्जलिः*; डा. वि. सुब्रह्मण्यम् (सम्पादकः); श्रीभाष्यं विजयसारथिः (अनुवादकः); हैदराबाद्- संस्कत अकाडमी; २०२०।

३. *गीताञ्जलिः*; पुल्लेल श्रीरामचन्दुडु (अनुवादकः); नवदेहली- साहित्य अकाडमी; २०१२।

४. *गीताञ्जलिः*, के. रामकृष्णवारियर् (अनुवादकः); एरणाकुलम्- चिन्मय इन्टर्नाषणल् फौण्डेषन् शोधसंस्थानम्; २००८।

५. *गीताञ्जलिः*; कालिपदतर्काचार्यः (अनुवादकः); कोलकता- विश्वभारती; १९६२।

✶ ✶ ✶

# मम्मटनये दोषतत्त्वविमर्षः

**भास्करः गङ्गोपाध्यायः*** 

**उपोद्घातः**

काव्यस्यापकर्षसाधकदोषाः प्राचीनालङ्कारिकैः आलोचिताः। किञ्च दोषाः काव्यस्य कलङ्कस्वरूपाः। दोषः सहृदयचित्ते वैरस्यम् उद्रेचयति उत्पादयति। अतः मम्मटेनोक्तम्– 'अपदोषतैव विगुणस्य गुणः'। काव्यस्य निर्दोषकत्वं कवेरन्यतमं कर्तव्यमिति भामहेन कारिकायां अतीव स्पष्टतया उल्लिख्यते–

सर्वथा पदम् अप्येकं न निगाद्यम् अवद्यवत्।
विलक्षणा हि काव्येन दुःसुतेनेव निन्द्यते॥

कुपुत्रः यथा पितुः कलङ्कस्य कारणं दुष्टकाव्यम् अपि तथा कवेः अपयशसः निदानम्। प्रसङ्गेऽस्मिन् आनन्दवर्धनस्य उक्तिरियं यथा– 'सूक्तिसहस्रद्योतितात्मनां महात्मनां दोषोद्घोषणमात्मन एव दूषणं भवति' इति। आलङ्कारिकैः कथ्यते यत् 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः'। वैकृत्यार्थकस्य दुष्- धातोः घञ्प्रत्ययेन दोष इति पदं निष्पद्यते। 'दुष्यते अनेन'इति अर्थात् येन किञ्चित् दूषितं भवति। काव्यदोषाः काव्यस्यानिष्टजनकाः॥ महाभाष्यकारेण पतञ्जलिना श्रुतिमूले शब्दार्थप्रयोगविषये उच्यते-

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तम् आप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥
(महाभाष्यस्य प्रथमाह्निकम्) इति।

वाक्यपदीये ग्रन्थे आचार्येण भर्तृहरिणा– 'उच्यते कवेर्निर्मितौ काव्ये वाक्शुद्धिरेव तस्य अभीष्टसाधने अर्थात् सहृदयस्य मनोरञ्जने प्रधानः सहायको भवति'। प्रसङ्गेऽस्मिन् उच्यते–

तद् द्वारम् अपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते॥

नैयायिकमते अदोषता तावत् दोषाभावः। कवय आलंकारिकाश्च शब्दवाक्ययोः शुद्धताविषये विशेषतया सचेतना आसन्। अस्मिन् प्रसङ्गे आचार्येण दण्डिना उक्तम्-

गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥ इति

* संशोधकः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य

सुन्दरलौकिकदृष्टान्तमाध्यमेन तेन कथ्यते यत् अतीव सुन्दरे रमणीये देहेऽपि यदि स्वल्पमात्रं श्वित्रचिह्नं वर्तते, तद् यथा निन्दनीयं भवति, तथा च सर्वाङ्गसुन्दरे काव्यदेहे सामान्यमात्रं दोषत्वं सहृदयस्य समीपे अनादरणीयं भवति–

तदल्पम् अपि नोपेक्ष्य काव्ये दुष्टं कथञ्चन।
स्याद् वपुः सुन्दरम् अपि श्वित्रेणैकेन दुर्भगम्॥

**अलङ्कारशास्त्रे दोषाणां विवर्तनम्**

**भरताचार्यमते दोषाः**

संस्कृतालंकारशास्त्रेषु प्राचीनतमः प्रामाणिकग्रन्थः भरतेन विरचितं नाट्यशात्रम्। नाट्यशास्त्रस्य षोडशाध्याये दोषविषये आलोचितम्। भरतेन दशविधाः काव्यदोषा उल्लिखिताः–

गूढार्थमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम्।
न्यायादपेतं विषमं विसन्धि शब्दच्युतं वै दश काव्यदोषाः॥

(नाट्यशास्त्रम् १६.८७.८८) इति।

भरतोक्तस्य लक्षणस्य वैशिष्ट्यानि–

(१) गूढार्थदोषः [२]
(२) अर्थान्तरदोषः [३]
(३) अर्थहीनसंज्ञकदोषः [४]
(४)भिन्नार्थदोषः [५]
(५)एकार्थसंज्ञकदोषः [६]
(६) अभिप्लुतार्थकदोषः [७]
(७) न्यायादपेतसंज्ञकदोषः [८]
(८) विषमदोषः [९]
(९) विसन्धिदोषः [१०]

---

[२] तदेव १६.८९
[३] तदेव १६.८९
[४] तदेव १६.९०
[५] तदेव १६.९०-९१
[६] तदेव १६.९२
[७] तदेव १६.९२
[८] तदेव १६.९३
[९] तदेव १६.९३
[१०] तदेव १६.९४

(१०) शब्दच्यूतदोषः [११]

## भामहेन काव्यालङ्कारवर्णिताः दोषाः

भामहेन तदीये काव्यालङ्कारग्रन्थे प्रथमे परिच्छेदे दशविधकाव्यदोषाणां विषये वर्णिताः। अपि च, चतुर्थपरिच्छेदादौ आदौ तेन पुनः दशविधदोषाणां नामोल्लेखं कृत्वा सविस्तारं विवरणं प्रदीयते–

(१) अपार्थदोषः

(२) व्यर्थदोषः [१२]

(३) एकार्थसंज्ञकदोषः [१३]

(४) ससंशयदोषः [१४]

(५) अपक्रमदोषः

(६) शब्दहीनदोषः

(७) यतिभ्रष्टः भिन्नवृत्तश्चेति दोषः

(८) विसन्धिदोषः

(९) देश-काल-कला-लोकन्याय-आगम-विरोधसंज्ञकदोषश्चेति।

अपि च भामहेन पञ्चमे परिच्छेदे प्रतिज्ञाहीनः हेतुहीनः दृष्टान्तहीनश्च त्रिविधाः दोषा आलोचिताः, अपि च अस्य परिच्छेदस्यान्ते काचित् काव्यिकत्रुटिः, द्वितीये परिच्छेदे उपमाविषयकदोषा आलोचिताः।

## दण्डिप्रणीतस्य काव्यादर्शस्य काव्यदोषाः

काव्यादर्शग्रन्थस्यान्तिमे आचार्येण दण्डिना दशविधकाव्यदोषा आलोचिताः-

(१) अपार्थदोषः

(२) व्यर्थदोषः

(३) एकार्थदोषः [१५]

(४) ससंशयदोषः

(५) अपक्रमदोषः

---

[११] तदेव १६.९४

[१२] विरुद्धार्थं मतं व्यर्थं विरुद्धं तूपदिश्यते। पूर्वपरार्थव्याघातात् विपर्ययकरं यथा॥ (काव्यालङ्कारः ४.९)

[१३] यदभिन्नार्थमन्योन्यं तदेकार्थं प्रचक्षते। पुनरक्तमिदं प्राहुरन्ये शब्दार्थभेदतः॥ (काव्यालङ्कारः ४.९)

[१४] श्रुतेः सामान्यधर्माणां विशेषस्यानुदाहृतेः। अप्रतिष्ठं यदत्रेति तज्ज्ञानं संशयं विदुः॥ (काव्यालङ्कारः ४.१७)

[१५] अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्यते। अर्थतः शब्दतो वापि तदेकार्थं मतं यथा॥ (काव्यादर्शः ३.१३५)

(६) शब्दहीनदोषः
(७) यतिभ्रष्टदोषः [१६]
(८) भिन्नवृत्तदोषः
(९) विसन्धिदोषः
(१०) देशकालकलालोकन्यायागमविरोधिदोषः

## वामनप्रणीते काव्यालंकारे दोषविचारः

वामनेन काव्यालङ्कारसूत्रवृत्तिग्रन्थे पददोषः पदार्थदोषः वाक्यार्थदोषः वाक्यदोषश्च दोषचतुष्टयं प्रदर्शितम्। पददोषस्यालोचनान्ते पदार्थदोषस्य पञ्चविधत्वं स्वीक्रियते। अस्मिन् प्रसङ्गे तेन कथ्यते– ‘अन्यनेयगूढार्थाशीलक्लिष्टानि च’ [१७] इति। अतःपरं वाक्यदोषस्य गणनाप्रसङ्गे उक्तम्– ‘भिन्नवृत्तयतिभ्रष्टविसन्धीनि वाक्यानि’ इति। सप्तविधवाक्यार्थदोषाणां स्वरूपं तेन वर्णितम्। तस्मिन् लक्षणप्रसङ्गे निगदितम्– ‘व्यर्थैकार्थसन्धिग्धायुक्तापक्रमलोकविद्याविरुद्धानि’ [१८]।

## रुद्रटस्वीकृताः दोषाः

वामनपरवर्तिना आलंकारिकेण रुद्रटेन काव्यालंकारग्रन्थे विविधाः काव्यदोषा उल्लिखिताः। तन्मते द्विविधौ दोषौ यथा शब्ददोषः अर्थदोषश्च। शब्ददोषस्य पुनः भेदद्वयमस्ति पददोषः वाक्यदोषश्च। षष्ठेऽध्याये अनयोः वाक्यदोषयोः विषये तेन आलोच्यते।

## आनन्दवर्धनप्रणीते ध्वन्यालोके आलोचिताः दोषाः

रुद्रटपरवर्तिनि काले ध्वनिप्रस्थानस्य प्रवर्तकः आचार्य आनन्दवर्धनः। तेन एव सर्वप्रथमं रसविचारेण दोषस्य स्थानं निर्दिष्टम्। तन्मते रसध्वनिरेव काव्यस्यात्मा। अतः रसव्यञ्जनायाः यः परिपन्थी, आनन्दवर्धनेन सा अचारुता दुष्टता वेति वर्णिता। आनन्दवर्धनेन द्विविधौ काव्यदोषौ स्वीकृतौ। प्रथमः कवेरुत्पन्नजनितदोषोऽपरश्च तदीयशक्तेरभावजनितदोषः। अतः आनन्दवर्धनेन शब्दार्थौ दोषौ परम्परासम्बन्धे काव्यदोषरूपेण स्वीकृतौ। ततोऽलंकारस्य यथास्थानं सन्निवेशे स सौन्दर्यविधायकः सन् रसाभिव्यक्तेः हेतुर्भवति रसभङ्गस्य कारणं वा भतेत्।

## मम्मटमते दोषतत्त्वविचारः

[१६] श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः। तदपेतं यतिभ्रष्टं श्रवेणोस्वेजनं यथा॥ (काव्यादर्शः ३.१५२)
[१७] काव्यालङ्कारसूत्रवृत्तिः २.८.१.
[१८] तदेव २.१.११

काव्यदोषस्य विवर्तनेतिहासे खृष्टीयैकादशशताब्द्याः शेषार्धे मम्मटभट्टस्य आविर्भाव एकं नवाध्यायं सूचयति। काव्यप्रकाशस्य सप्तमे उल्लासे सुसंहतकाव्यदोषविषये मम्मटेन प्रदीयते।

## दोषस्य लक्षणं स्वरूपञ्च

काव्यलक्षणे 'अदोषौ' इति पदं प्रयुज्य मम्मटेनोक्तम्- 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'[१९]। इति 'शब्दार्थौ' इति पदस्य विशेषणेषु अदोषः दोषहीनता प्रथमविशेषणम्। दोषलक्षणप्रसङ्गे तेनोक्तम्-

> मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः।
> उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥ (तदेव ७.१४९) इति।

दोषस्य लक्षणप्रसङ्गे मम्मटेन आदौ कथ्यते- 'मुख्यार्थहतिर्दोषः'। वृत्तौ तेनोक्तम्- 'हतिरपकर्षः' इति। हतिः पदस्यार्थः अपकर्षः। अत्र 'मुख' इत्यनेन रसो बुध्यते। रसः इत्यनेन तस्य समशीर्षकाभावः रसाभावः भावाभावश्च बुध्यते। काव्यप्रदीपकारेणोक्तं- 'रस्यते इति व्युत्पत्त्या रसशब्देन भावादिरप्युसङ्गृह्यते'इति। अतः भावादेरपघातकत्वमपि दोषः। एतस्मिन् प्रसङ्गे काव्यप्रदीपे कथ्यते- 'मुख्यस्यार्थस्य हतिर्यस्मात् व्यधिकरणत्वेऽपि गमकत्वाद् बहुव्रीहिः' इति। रसप्रधानकाव्ये रसप्रतीतौ यो विघ्न उत्पद्यते स दोषपदवाच्यः भवति। अपि च नीरसकाव्ये अवलम्बितस्य चमत्कारवाक्यार्थप्रतीतेः यः परिपन्थी सैव दोषः कथ्यते। इत्थं लक्षणस्य व्याख्याने वामनरुद्रटाद्यालंकारिकैः आलोचितानां शब्दगतदोषे अव्याप्तिर्भवति। इदम् असङ्गतिनिवारणं कृत्वा काव्यप्रकाशकारेण उच्यते- 'उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः'[२०] इति। अतः पद-वाक्य-वर्ण-रचनागतत्रुटयश्च परम्परासम्बन्धेन दोषा इति विवेच्यते। अस्मिन् विषये मम्मटस्य विशेषकृतित्वप्रसङ्गे ड० राघवन्महोदयेनोक्तम्- 'Though are pointed out even earlier that the Dosas could be spoken of even as regards sanghatana, vritti etc, are did not see till now the writer who definitely mentioned or elaborated Dosa in those departments of poetic expression also. Here we have Mammata clearly speaking of Varnadosas and Racana-dosas' इति।[२१] इति

## मम्मटनये दोषभेदाः

---

[१९] काव्यप्रकाशः प्रथमोल्लासः

[२०] तदेव-७.४९

[२१] डॉ. राघवन्महोदयेन सम्पादितो भोजराजस्य शृङ्गारप्रकाशः

आलंकारिकैः काव्यदोषा नित्यत्वानित्यत्वभेदेन विभक्ताः। अनुकरणस्थलं विना अन्यस्मिन् स्थले दोषाणां दोषत्वपरिहारः न सम्भवेत्। ततः काव्यप्रदीपकारेण ते च नित्यदोषाः इति परिगण्यन्ते। दोषाणामलोचनप्रसङ्गे तेन आदौ शब्ददोषाणां कथा उल्लिखिता। शब्ददोषेषु आदौ पददोषोऽस्ति। अतःपरं पद्यांश-वाक्यदोषयोः कथा आलोचिता। ततः अर्थदोषस्यान्तिमे रसदोषस्यालोचना भवति।

**शब्ददोषाः -** शब्दविशेषं परिवर्त्य ये दोषाः संघटन्ते ते शब्ददोषा इति नाम्ना अभिधीयन्ते।

> दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तसमर्थम्।
> निहितार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम्।
> अवमृष्टं विधेयांशं विरुद्धमतिकृत्समासगतमेव॥
> (काव्यप्रकाशः ७.५०-५१) इति

**१) श्रुतिकटुः -** मम्मटेन अस्मिन् दोषलक्षणे उक्तम्- 'श्रुतिकटु परुषवर्णरुपं दुष्टम्' इति। दोषस्यास्योदाहरणप्रसङ्गे मम्मटेन भणितम्-

> अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।
> आलिङ्गितं स तं व्यङ्ग्या कार्तार्थ्यं लभते कदा॥ (तदेव) इति।

नायकनायिकयोः मिलनेच्छायां काचन कुटिनी अत्र तत् कथ्यते तेषु 'कार्तार्थ्य' इति पदं सत्यमेव श्रुतिकटुदोषेण दुष्टं भवति।

**२) च्युतसंस्कृतिः -** मम्मटेन निगदितं दोषलक्षणं यथा- 'च्युतसंस्कृति व्याकरणलक्षणहीनम्'[२२]। व्याकरणहीनः पदप्रयोगः च्युतसंस्कृति इति अभिहितम्। लक्षणस्योदाहरणप्रसङ्गे मम्मटेनोक्तम्-

> एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर।
> दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथा॥ (काव्यप्रकाशः) इति।

अस्मिन् उदाहरणे याञ्चार्थे नाथ्धातोः 'अनुनाथते' इदमात्मनेपद-प्रयोगः मम्मटेन च्युतसंस्कृतिदोषेण दुष्टः कथितः।

**३) अप्रयुक्तदोषः -** दोषलक्षणे मम्मटेन कथितम्- 'अप्रयुक्तं तथा आम्नातमपि कविभिर्नादृतम्'[२३] इति। कोषव्याकरणादिशास्त्रेऽनुशिष्टः सन् कविभिः यस्य पदस्य प्रयोगः न क्रियते तस्य पदस्य प्रयोगे अप्रयुक्तदोषो भवति।दृष्टान्तस्वरूपेण तेन कथितम्-

[२२] काव्यप्रकाशः सप्तमोल्लासः
[२३] तदेव

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो...
पायात् स स्वयमन्धकक्षयकरस्त्वा गं सर्वदोमाधवः॥
(काव्यप्रकाशः सप्तमोल्लासः) इति।

तृतीयपदे 'राहु' इत्यस्यार्थे शशीमच्छब्देऽप्रयुज्यमाने सति श्लेषस्यानुरोधे प्रयोगः दोषयुक्तो न भवति।

**४) असमर्थदोषः -** प्रयुक्तपदं विवक्षितार्थस्य वाचकः भवत्येव अस्यार्थस्य प्रतिपादने सामर्थ्यहीनोऽभवत् चेत् विवक्षितार्थसावगमकत्वं न स्यात् तत्पदम् असमर्थदोषेण दुष्टं भवति। अस्मिन् प्रसङ्गे मम्मटेनोक्तम्- 'असमर्थं यत्तदर्थं पठ्यते न च तत्रास्य शक्तिः'।

**५) निहतार्थदोषः -** अस्मिन् दोषलक्षणे मम्मटेनोक्तम्- 'निहितार्थं यदुभयार्थमप्रसिद्धेऽर्थे प्रयुक्तम्'। यानि पदानि अनेकार्थानि, तानि पदानि प्रसिद्धार्थे न प्रयुक्तानि किञ्च अप्रसिद्धार्थे यदि प्रयुक्तानि भवन्ति, तर्हि अन्तरितानि सन्ति विलम्बेन प्रतीतानि भवन्ति।

**६) अनुचितार्थदोषः -** अस्मिन् प्रसङ्गे डा. राघवन्महोदयेन निगदितम्-'Anucita- pada is perhaps Mammata's new introduction it is an inappropriate would and though it's scope and significance are very wide. Mammata's illustration- makes it's somewhat definite.' इति। अस्मिन् प्रसङ्गे मम्मटेन सुष्पष्टं लक्षणं न कृतम्। साधारणतया वक्तुं शक्यते यस्यार्थः अनुचितः स एव अनुचितार्थः।

**७) निरर्थकदोषः -** दोषस्यास्य लक्षणाप्रसङ्गे मम्मटेनोक्तं- 'निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम्'इति। निरर्थकस्य पदस्य प्रयोगे काव्यं प्रति सहृदयानां स्वाभाविकविमुखता एव दोषास्यास्य दूषकताबीजम्। प्रदीपकारेण प्रसङ्गेऽस्मिन् उक्तम्- 'निरर्थकं प्रयुक्तज्ञानस्य वचसि सहृदयानां वैमुखं कूषकतावीजम्।

**८) अवाचकदोषः -** काव्यप्रदीपकारेण अस्मिन् दोषलक्षणे भणितम्- 'विवक्षितधर्मविशिष्टस्य विवक्षितधर्मिणः क्वापि न वाचकं यत्तदित्यर्थः' अर्थात् यः न कस्मिन् अपि स्थले विवक्षितधर्मविशिष्टविवक्षितधर्मिणः वाचकत्वं न भवति, स एव अवाचकदोषः। दृष्टान्तस्वरूपेण तेन उदाहरणं प्रदीयते-

अवन्ध्यकोपस्य विहन्तुरापदं भवन्ति वश्याः स्वयमेव देहिनः।
अमर्शशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः॥
(किरातार्जुनीयम् १.३३) इति।

विशेषणस्य वाचकत्वाभाववशात् 'जन्तु' इति शब्दोऽवाचकदोषेण दुष्टः सञ्जातः।

**९) अश्लीलदोषः -** मम्मटेन लक्षणप्रसङ्गे कथितम्- 'त्रिधेति व्रीडाजुगुप्सामङ्गलानाम् अभिव्यञ्जकपदानां प्रयोगोऽश्लीलदोषेण दुष्टेति परिगणितो भवति। मम्मटेन प्रकारत्रयाणाम् अश्लीलदोषाणामुदाहरणं प्रदीयते-

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते।
तस्य धीशालिनः कोऽन्यः सहेतरलितां ध्रुवम्॥ इति।

अत्र विवक्षितार्थः व्रीडाया अवलम्बनत्वात् प्रकृतार्थे अन्वितः भवति, तस्मादत्र अश्लीलदोषः भूयते। एतद्भिन्नाः विविधाः दोषाः वर्तन्ते। यथा-

१०) सन्दिग्धदोषः
११) अप्रतीतदोषः
१२) ग्राम्यसंज्ञकदोषः
१३) नेयार्थदोषः
१४) क्लिष्टदोषश्चेति।

पदस्यालोचनात् परं मम्मटेन सप्तपद्यांशगतदोषा आलोचिताः।

**वाक्यदोषाः**

शब्ददोषविवृतिप्रसङ्गे एकविंशतिः वाक्यदोषाः परिगणिताः। मम्मटनये दोषाः केवलं वाक्ये एव सन्ति। अस्मिन् प्रसङ्गे मम्मटेनोक्तम्-

प्रतिकूलवर्णमुपहतलुप्तिविसर्गं विसन्धिहतवृत्तम्।
भग्नोपक्रममक्रम-मतपरार्थं च वाक्यमेव तथा॥
(काव्यप्रकाशः सप्तमोल्लासः) इति।

**(१) प्रतिकूलवर्णदोषः -** दोषस्यास्य लक्षणप्रसङ्गे मम्मटेनोक्तम्- 'रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतं प्रतिकूलवर्णम्'। वाक्ये विवक्षितरसस्य प्रतिकूलानुगुणवर्णयोः प्रयोग एव प्रतिकूलवर्णदोषः।

**(२) उपहतिविसर्गः लुप्तविसर्गश्च -** यस्मिन् वाक्ये बहुषु पदेषु विसर्गः प्राप्तः सन् प्रयुज्यमानो भवति स एव उपसर्गदोषः। प्रसङ्गेऽस्मिन् मम्मटेनोक्तम्- 'उपहत उत्वं प्राप्तो लुप्तो वा विसर्ग यत्र तत्'[२४]। इति

**(३) विसन्धिदोषः -** अस्मिन् दोषलक्षणे मम्मटेन कथितम्- 'विसन्धिसन्ध्येर्वैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च'। तेन सन्धेः वैरूप्यमेव विसन्धिदोषस्य लक्षणमिति निर्दिष्टम्।

[२४] तदेव

**(४) हतवृत्तदोषः -** प्रकृतरसस्याननुगुणवृत्तस्य प्रयोगः तेन हतवृत्तदोषनाम्ना अभिहितः। तस्मिन् लक्षणप्रसङ्गे तेन भणितम्- 'हतं लक्षणानुसरणेऽप्यश्रव्यम् अप्राप्तगुरुभावान्तलघु रसाननुगुणं च वृत्तं यत्र तत् हतवृत्तम्' इति।
**(५) न्यूनपदाधिकपददोषौ -** दोषद्वयं मम्मटस्य नवसंयोजनम् इति मन्ये। यस्य पदस्यार्थः विवक्षितः तादृशस्य पदस्यानुपादानेन न्यूनपददोषः। पदस्यार्थेऽविवक्षितेऽधिकपददोषो भवति।
**(६) कथितपददोषः -** प्रयोजनं विना समानार्थकसमानानुपूर्वीकपदयोः नानाविधे उपादाने कथितपददोषो भवति।

**(७) पतत्प्रकर्षदोषः -** अस्मिन् प्रसङ्गे वाक्यप्रदीये कथ्यते- 'पतत्प्रकर्षः। अलंकारस्य बन्धकृतस्य वा प्रकर्षस्य यत्रोत्तरं पातो निकर्षः॥'[२५] एतद्भिन्नाः विविधाः दोषाः वर्तन्ते। यथा-
(८)समाप्तपुनरात्तत्वदोषः
(९)अर्धान्तरैकवाचकदोषः
(१०)अभवन्मतयोगदोषः
(११)अनभिहितवाच्यदोषः
(१२)अस्थानस्थपदम् अस्थानस्थसमासदोषश्च
(१३)सङ्कीर्णः गर्भितदोषश्च
(१४)प्रसिद्धिहतदोषः
(१५)भग्नप्रक्रमदोषः
(१६)अक्रमदोषः
(१७)अमतपरार्थदोषश्चेति।

## अर्थदोषाः

वाक्यदोषस्यालोचनात् परं मम्मटेन अर्थदोषाणाम् आलोचना कृता। मम्मटेन त्रयोविंशतिः अर्थदोषा उल्लिखिताः। काव्यप्रकाशग्रन्थस्य सप्तमे उल्लासे मम्मटेन ते दोषा आलोचिताः-

अर्थोऽपुष्टः कष्टो व्याहत-पुनरुक्त-दुष्क्रम-ग्राम्याः।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च।
अनवीकृतः सनिममा-नियम-विशेषा-विशेष-परिवृत्ता।
साकांक्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः।
विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः॥

(काव्यप्रदीपः सप्तमोल्लासः) इति।

[२५] काव्यप्रदीपः सप्तमोल्लासः

## रसदोषाः

आनन्दवर्धनमनुसृत्य मम्मटेन रसदोषाणां विवरणं प्रदीयते। अस्मिन् प्रसङ्गे तेन त्रयोदशविधाः रसदोषा उल्लिखिताः-

व्यभिचारि-रस-स्थायिभावानां शब्दवाच्यता।
कष्टकल्पनया व्यक्तिरनुभव-विभावयोः॥
प्रतिकूल-विभावादिग्रहदीप्तिः पुनः पुनः।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः॥
अङ्गेनाननुसन्धानं प्रकृतीनां विपर्ययः।
अनङ्गस्याभिधानं च रसे दोषा स्युरीदृशाः॥ (काव्यप्रकाशः) इति।

रसस्य स्वभाव एव किन्तु विभावादेः व्यञ्जितत्वात् आस्वाद्यते। व्यभिचारिभावरसस्थायिभावानां स्वशब्दवाचकत्वात् दोषत्रयरूपेण परिगण्यते-
(१) व्याभिचारिभावस्य स्वशब्दवाच्यतः रसदोष उत्पद्यते।
(२) साक्षात्त्वसशब्देन शृङ्गारादिरसविशेषवाचकशब्देन च वाच्यं यदि स्यात् रसास्वादनं सुन्दरं न भवति।
(३) स्थायिभावस्य स्वशब्दवाचकत्वात् रसदोषः भवति।
(४)अनुभावविशेषस्य कल्पनात् रसदोषो भवति।

प्राचीनकालात् विभिन्नैः आलंकारिकैः दोषविषये यत् निदर्शनं प्रदीयते मम्मटप्रणीते काव्यप्रकाशग्रन्थे तानि सर्वाणि समृद्धानि समुपलभ्यन्ते।

## उपसंहृतिः

मम्मटप्रदत्तस्य काव्यसंज्ञान्तर्गतस्य 'अदोषौ' इति पदस्योपरि विश्वनाथकविराजस्यापत्तिः न स्वीकृता। दोषस्य सम्यग्धारणत्वात् कविः प्रयत्नेन दोषं तस्य साहित्यदृष्ट्या परिहृतवान्। दोषस्य वर्गीकरणे दृश्यते यत् शब्दवाक्यार्थानां रसानां भेदाः स्वीकृताः इति। अस्मिन् प्रसङ्गे अग्निपुराणे कथ्यते-

उद्वेगजनको दोषः सत्यानां स च सप्तधा।
वक्तृवाचकवाच्यानामेकद्वित्रिनियोगतः॥ (अग्निपुराणम् ३४७.१) इति।

शब्दवाक्यार्थरसेषु विभागचतुष्टयेषु दोषस्याधिक्यं भवति। अर्थात् शब्ददोषात् वाक्यदोषः प्रबलतरः, तथाहि अर्थदोषः तस्मादपि तीव्रः भवति। रसदोषः प्रबलतमो भवति। अतः काव्यलक्षणे 'दोषहीनता' 'अदोषौ' इति पदद्वयस्य समावेश आवश्यकः। दोषस्य प्रकारो यद्वा भवतु, दोषज्ञानं विहाय कविना रचनानैपुण्यं न लभ्यते। सहृदयाः काव्यस्य समुचिते आस्वादने न समर्थाः भवेयुः। आलंकारिकाणां सिद्धान्तौचित्ये रसस्य प्रतिष्ठा भवति। यस्मिन् स्थले

अनुचितालम्बनोपनिबद्धाः स्युः तत्स्थले रसः रसाभासे परिणतो भवति। अस्मिन् प्रसङ्गे रसगंगाधरस्य प्रथमे आनने उच्यते- 'अनुचितविभावालम्बनत्वं रसाभासत्वम् अर्थात् रसस्य स्वरूपच्युतिः संघटते।' इति।

परिशेषे वक्तुं शक्यते यत् मम्मटप्रणीतानां दोषाणां पर्यालोचनायाम् सिद्धान्तेऽस्मिन् उपनीयते यद् दोषाणां सूक्ष्मावान्तरभेदे सत्त्वेऽपि दोषविषये मम्मटस्य दृष्टिः लक्ष्यञ्च यथार्थं प्रासङ्गिकम्। द्वादशशताब्द्याः पूर्ववर्तिनालंकारिकेण मम्मटः प्रभावितः जातः, किन्तु दोषतत्त्वस्यालोचना ते बहुलांशेन ऋद्धा जाता इति शिवम्।

## परिशीलितग्रन्थसूची -


१. *काव्यप्रकाशः* ('बालबोधिनी' टीकोपेतः); मम्मटाचार्यः; भट्टवामनाचार्यझलकिकरः (सम्पादकः); मुम्बाई - निर्णय सागर प्रेस; १९०१ (द्वितीयाङ्कनावृत्तिः)।

२. *काव्यादर्शः* (प्रेमचन्द्रतर्कवागीशभट्टाचार्य्य-विरचितः 'मालिन्यप्रोज्छनी' टीकासहितः); दण्ड्याचार्यः; चिन्मयी-चट्टोपाध्यायः (सम्पादकः); कलिकाता - पश्चिमवङ्ग राज्य पुस्तक पर्षत्; १९९५।

३. *ध्वन्यालोकः*; आनन्दवर्धनः; के. कृष्णमूर्तिः (सम्पादकः) ; दिल्ली - मोतीलाल बनारसीदास; १९८२ (द्वितीयं संस्करणम्)।

४. *वक्रोक्तिजीवितम्* (स्वोपज्ञवृत्तिसमेतम्); कुन्तकाचार्यः; सुशीलकुमार दे (सम्पादकः); कलिकाता - फार्मा. के.एल. मुखोपाध्याय; १९६१ (तृतीया अङ्कनावृत्तिः)।

५. *साहित्यदर्पणः* (हरिदास-कृतः 'कुसुमप्रतिमा' टीकोपेतः); विश्वनाथः; हरिदाससिद्धान्तवागीशः (सम्पादकः) ; कलिकाता - सिद्धान्तविद्यालयः; १८७५ (पञ्चमं संस्करणम्)।

६. *अमरकोषः*; अमरसिंहः; गुरुनाथविद्यानिधिभट्टाचार्य्य (सम्पादकः) ; कोलकाता - संस्कृतपुस्तकभाण्डार; १४१७ बङ्गाब्दः।

७. *Post-Jaganath Alamkara-Sastra*; Sivakumara Swamy; New Delhi - Rastriya Sanskrit Sanshan; 1998(First Edition).

८. *साहित्येर दोष,गुण ओ अलंकारप्रसङ्गे आचार्य मम्मट*; अमियकुमारः भट्टाचार्यः; कोलकाता - संस्कृतपुस्तकभाण्डारम्; २००५।

९. *साहित्यदर्पणम्*; विमलाकान्तः मुखोपाध्यायः; कोलकाता - संस्कृतपुस्तकभाण्डारम्; २०१३।

१०. *संस्कृत अलंकारशास्त्रे दोषतत्त्व*; अणिमा साहा; कोलकाता - संस्कृत कलेज; १९७३।

११. *संस्कृत अलंकारशास्त्रे तत्त्व ओ समीक्षा*; धीरेन्द्रनाथः वन्द्योपाध्यायः; कोलकाता - पश्चिमवङ्ग राज्य पुस्तक पर्षत्; २०१२।

१२. *साहित्यदर्पण ग्रन्थेर तुलनामूलक विश्लेषण*; तारकनाथः चन्द्रः; कोलकाता - संस्कृतपुस्तकभाण्डारम्; २००४।

# प्रत्नश्रुतिव्यवस्थावगमः

**आवीरलालगङ्गोपाध्यायः** *

**उपोद्घातः**

अधुनाख्यातयोरुत्तरदक्षिणसङ्गीतपरम्परयोः षड्जादिशुद्धसप्तस्वरान् विकृतर्षभादीन् यथाप्रयुक्तं विहायापि स्वरसौक्ष्म्यं दृश्यते। यथा हि औत्तरीये चन्द्रकोषरागे शुद्धनिषादस्य तीव्रनिषादस्य वा अतितीव्रता दृश्यते। यद्वा मारवारागे कोमलस्य ऋषभस्य अतिकोमलता प्रयुज्यते। किञ्च, दाक्षिणात्येऽपि तोडिरागे शुद्धऋषभश्रुतेः न्यूनैव प्रयुज्यते श्रुतिः, शङ्कराभरणेऽपि काकलीनिषादस्य प्रयोगो भवति तीव्रात्मना षड्जानुस्वारेण इत्यादि पारम्परिकप्रामाण्याद् बोद्धव्यम्। तेन शुद्धान् विकृतींश्च विहाय सन्ति तावन्तः सूक्ष्माः स्वराः येषां श्रुतिरिति संज्ञा। ननु चतुर्थश्रुतिः षड्जस्येति तत्स्वरस्यापि श्रुतित्वं स्वीकृतं किलेति चेत् सत्यं तस्यापि श्रुतित्वं तेनैव द्वाविंशतिश्रुतिसिद्धिः, किन्तु स्वर इति तस्य विशेषसंज्ञा श्रुतिस्वरयोः पार्थक्यज्ञापनार्थम्। व्यापिका श्रुतिः, व्याप्यश्च स्वरः। तत्रापि विशिष्टश्रुतेः यत् स्वरत्वं तत्तु लक्ष्यप्रमाणात् सिद्ध्यति। प्रथमे चित्रे एकं द्वे इत्यादयः श्रुतयः तत्र चतुर्थश्रुतौ षड्जस्वरः (चित्रम् १)। तथैव चतुर्थ्याः परं त्रिश्रुत्याश्रितता ऋषभस्य एवम् अग्रेऽपि (चित्रम् १)। तस्मात् तृतीयश्रुतौ ध्वनिः निर्गच्छति चेत् तस्य षड्जसंज्ञा एव, किन्तु तस्य षड्जस्य शुद्धस्वरता न, अपि तु विकृतत्वम्। शुद्धादिसंज्ञायास्तु देशकालपरम्परावच्छिन्नत्वं ज्ञेयम्। ननु तृतीयश्रुतौ षड्जस्य स्थितौ ऋषभस्य चतुःश्रुतित्वापत्तौ चतुर्थश्रुतेः ऋषभत्वापत्तिरिति चेत् न ऋषभत्वापत्तिः, किन्तु ऋषभजनके अंशत्वापत्तिरिति समयः। विस्पष्टं किल तत्रभवान् वेङ्कटमखी आह–

श्रुतिर्नाम भवेन्नादविशेषः स्वरकारणम्।
ननु नास्ति स्वरश्रुत्योर्भेदो नादैकरूपयोः॥
विद्यते परिणामत्वपरिणामित्वसम्भवः।
अस्ति भेदस्तयोर्यद्वत्स्वर्णटङ्ककिरीटयोः॥

(चतुर्दण्डिप्रकाशिका २.२-३) इति।

---

* संशोधकः, संस्कृतविभागे, हैदराबादविश्वविद्यालयः, हैदराबादः– 500046, भारतम्




चित्रम् १ - श्रुतिषु स्वरस्थितिः श्रुतिस्वरसम्बन्धश्च

तेन नादात्मना सकलस्यापि शब्दस्य ग्रहणेऽपि विशेषत्वापत्तौ स्वरकारणस्य श्रुतिरिति संज्ञा। तेन स्वरः नादविशेषः श्रुतेः कार्यरूपः। द्वयोस्तेन कार्यकारणसम्बन्धः। तथाहि श्रुतिरेव स्वरत्वेन परिणम्यते। तत्र स्वरस्य परिणामत्वे श्रुतेः परिणामित्वमिति विवेकः। तत्रोदाहरति यथा लोहमणिमुकुटयोर्यो भेदः तथैव श्रुतिस्वरयोः।

तत्र श्रूयते इति श्रुतिरिति सामान्यनिर्वचनम्। बृहद्देशीरीत्या पश्यामश्चेत् श्रुतिविषयकचिन्तनक्रमस्य तात्त्विकविकासधोरणी बुद्धिमावर्जयति। तस्मात् तत एव आरभ्यास्माकं प्राचीनश्रुतिव्यवस्थायाः बोधो भवतु। बोधसरण्यां तु नाट्यशास्त्रसङ्गीतरत्नाकरादिविशेषशास्त्राणि समुपयुक्तानि भवेयुः।

## श्रुतिव्यवस्थायां बौद्धिकविवर्तनम्

### एका श्रुतिः

एकैव श्रुतिः इत्येको मतः। तल्लक्षणमुच्यते मुनिना मतङ्गेन- तत्रादौ तावद् देहाग्निपवनसंयोगात् पुरुषप्रयन्तप्रेरितो ध्वनिः नाभेः ऊर्ध्वम् आकाशदेशम् आक्रामन् धूमवत् सोपानपदक्रमेण पवनेच्छया अनेकधा आरोहन् अन्तर्भूतपूरणप्रत्ययार्थतया चतुःश्रुत्यादिभेदभिन्नः प्रतिभासते इति मामकीनं मतम् इति।[१] तत्रेत्यस्यायमर्थपरिष्कारो यत् शरीरस्थाग्निः तेजः तेन च शरीरस्थस्य वायोः संयोगवशात् पुरुषप्रयन्तेन जीवस्य चेष्टया इच्छया इति यावत्, प्रेरितः उद्बोधितः ध्वनिः नादः। एतेन नादस्य उद्भवे पुरुषचेष्टा निदानम्। कारणं तु दैहिकतेजोवायुसंयोगः। तत्फलं ध्वनिः। शिक्षायामपि-

> आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।
> मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
> मारुतस्तूरसि चरन् मन्दं जनयति स्वरम्।

(पाणिनीयशिक्षा ६-७ कख) इति।

आत्मेति सचैतन्यजीवस्य ग्रहणम्। अस्मिन् अतिप्रसिद्धे प्रसङ्गे बृहद्देशीतः

---

[१] बृहद्देशी पृष्ठम् ८

कैञ्चित्कं वैशिष्ट्यमस्ति। तत्र केवलेच्छा बृहद्देश्याम्। शिक्षायां तु इच्छा सार्था वर्तते। बुद्ध्या अर्थस्य संग्रहो वस्तुतः मध्यमायां वाचि अर्थचिन्तनम्। ततः तद्वक्तुकामः पुरुषः चेष्टां करोति। मनः कायाग्निम् इत्यादिषु प्रकृतप्रसङ्गसाम्यम्। एवमत्रांशप्राप्तिर्यत् इच्छया अत्र वैखरी वाक् एव निर्गच्छति। तस्याः व्यक्तत्वं वा अव्यक्तत्वं वा भवति। व्यक्तायां वाचि अर्थबोधकशब्दप्रकटनं भवति। अव्यक्तायां वाचि- साहित्यहीनकेवलगीतध्वनेः, संकेतबोधकध्वनेः, विशिष्टपुरुषस्य ध्वनिरित्येतत्पक्षबोधकस्य ध्वनेर्वा प्रकाशो भवति। विशिष्टपुरुषप्रसङ्गे तु घण्टाशब्दे घण्टाया अर्थवत्त्ववद् बोध्यम्। अर्थस्य व्यक्ताव्यक्तप्रसङ्गे एव व्यक्ताव्यक्तवाक्स्वारस्यमिति फलितम्।

पाणिनीयशिक्षायां व्यक्तपक्षस्वीकारः अर्थशब्दग्रहणेन स्पष्टम्। बृहद्देश्याः सङ्गीतसम्बन्धात् मुखविवरनिर्गलितशब्दाभिव्यक्तौ षड्जादयः द्योत्यन्ते, अर्थवत्त्वं तु भावादिव्यञ्जकत्वे एव इति ध्वनिकारव्यक्तिविवेककारा अत्र स्मर्याः। तेन लौकिकभाषादिपक्षे शिक्षाश्लोको युक्तस्तथा च गीतप्रसङ्गे मातङ्गमतं युक्तम्। ननु कश्चित् षड्जमुच्चार्य द्विश्रुतिऋषभमुच्चरति चेत् तत्र शब्दयोः षड्जऋषभयोः अर्थवत्त्वं प्रतीयते इति चेत् नूनं प्रतीयमानेऽपि स एव षड्जः अपरस्य पुरुषस्य काकलीनिषादश्चेत् ऋषभस्य षड्जत्वापत्तिरिति शब्दार्थदृष्ट्या प्रतिपत्तिर्न साध्या। तस्मात् तेषां द्योतकत्वमिति निश्चितम्। षड्जत्वादीनां किं परस्पराश्रयतया संज्ञाकरणम्? निश्चप्रचम्। अस्मिन्नेव प्रश्ने द्वाविंशतिश्रुतिस्वारस्यं निहितम्। तदग्रे वक्ष्यते।

प्रकृतमनुसरामः। पुरुषप्रयत्नप्रेरितध्वनिः नाभेः ऊर्ध्वम् आकाशदेशम् आक्रमति। नाभिशब्दे पञ्चमीप्रयोगात् ध्वनेः विश्लेषः ततः। तेन तस्य उत्पत्तिस्थलं नाभिरिति गम्यते। तदूर्ध्वाकाशदेशाक्रमणेन शिक्षाया उरश्चरणसाम्यम्। तेन ऊर्ध्वदेशस्य हृदयेन सह सम्बन्धः। वाचो मध्यमावस्था। स आक्रामनशीलो वायुः ऊर्ध्वगमनशीलधूमवत् ततोऽप्यूर्ध्वं गच्छति। सोपानक्रमः यथा स्तरशो भिद्यते तथैव भेदशीलो भूत्वा गच्छति। भेदात्मना बहुधा च भवति। अनेकभवत्वे पवनेच्छेति किम्? इच्छायाश्चैतन्यसम्पर्कः। तथाहि बुद्धिसहकृतसोपानारोहणक्रमेण एका एव श्रुतिः अनेकधा भूत्वा अन्तःस्था सत्येव विराजिता श्रुतिस्वरादिज्ञानविषयत्वेन बहिः चतुःश्रुत्यादिभेदेन षड्जादिभेदेन प्रतीयते इति मतङ्गमतम्। विशेषज्ञानादिकथनेन साङ्गीतस्वरादीनां सामान्यध्वनेः पार्थक्यमुक्तं भवति। तत्र स्वराणां संवादभित्तिरिति हेतुः। संवादाभावाभाववतः स्वरत्वम्। संवादाभावस्य अस्वरत्वम् इति च सङ्गीतसमयः। एतद् ज्ञास्यते नैसर्गिकद्वाविंशश्रुतिप्राप्तिविस्तारप्रसङ्गे।

## द्वे श्रुती

द्विप्रकारात्मिका श्रुतिरित्यन्ये। स्वरान्तरविभागाद् इति हेतुं प्रयुङ्क्ते मुनिर्मतङ्गः। तत्र विश्वावसुवाक्योद्धारो यथा–

श्रवणेन्द्रियग्राह्यत्वाद् ध्वनिरेव श्रुतिर्भवेत्।
सा चैकाऽपि द्विधा ज्ञेया स्वरान्तरविभागतः॥
नियतश्रुतिसंस्थानाद् गीयन्ते सप्त गीतिषु।
तस्मात् स्वरगता ज्ञेयाः श्रुतयः श्रुतिवेदिभिः॥
अन्तःस्वरविवर्तिन्यो ह्यन्तरश्रुतयो मताः।
एतासामपि चैश्वर्यं क्रियाग्रामविभागतः॥ (बृहद्देशी पृ. १०) इति।

एवमवगम्यते यत् द्विश्रुतिमतसमर्थकाः विश्वावसुवर्त्मपरायणा आसन् इति। एवमस्य परिष्कारो ज्ञेयः। श्रवणग्राह्यध्वनिरेव श्रुतिः। तस्य एकत्वम्। एकोऽपि स्वरः स्वरान्तरतया द्विधा। तत्र स्वरः नियमव्यवस्थितविशिष्टश्रुत्यवस्थानपरः। तस्मात् श्रुतयः स्वरेष्वेव अन्तर्गताः। किञ्च नियतश्रुतिव्यवस्थितस्वराणाम् अन्तर्वर्तिन्यः या श्रुतयः ते स्वरान्तराः। चित्रे (२) नीलवर्णाक्ताः सूचिताः।




चित्रम् २ - स्वरान्तरश्रुतयः

## त्रिधा श्रुतिः

त्रिविधश्रुतित्वे अस्ति मतद्वैविध्यम्। एके तु स्थानत्रययोगात् श्रुतेः त्रैविध्यं स्वीचक्रुः। अपरे पुनः इन्द्रियवैगुण्यात् त्रैविध्यमूचिरे। तत्र स्थानत्रययोगस्य बृहद्देश्यां प्रकारनामानि न सन्ति। प्रायः अनुमीयते यत् उरःकण्ठमूर्धभेदात् स्थानत्रैविध्यमिति स्याद् आशयः। [२] अपरमतत्रैविध्यं तु इन्द्रियवैगुण्यात्। तानि हि सहजं दोषजम् अभिघातजं चेति। एतेषां स्वरूपविषये तूष्णीम्भाव एवावलम्ब्यते ग्रन्थकृता।

[२] अत्र यद्यपि प्रेमलताशर्ममहोदयाभिः (बृहद्देशी पृष्ठम् १५६) मन्द्रमध्यतारात्मना स्थानत्रैविध्यं चिन्तितं, तत् सर्वथा योग्यमिति न चिन्त्यते। यतः मन्द्रादीनां उरःकण्ठादिसम्भवत्वं शास्त्रेषु स्वीकृतं तेन देहसम्बन्धेन प्रकारोद्देशोऽपि युक्तो भवितुमर्हति। अपि च, अपरत्रैविध्यप्रसङ्गे देहसम्बन्धसत्त्वे अत्रापि देहसम्बन्धस्य स्थितिः न दुरूहः।

## चतस्रः श्रुतयः

चतुर्विधा श्रुतिरित्यपरे। सा च वातपित्तकफसन्निपातरूपभेदभिन्ना। अत्रैवम् ऊह्यते यत् श्रुतेः त्रैविध्ये दोषजरूपभेदस्यैते भेदाः इति। शरीरदोषाः त्रयः सन्तोऽपि पुरुषप्रकृतिनिर्माणे क्वचिद् वातस्य क्वचिद् कफस्य क्वचिद् वा पित्तस्य बलवत्ता दृश्यते। क्वचिच्च त्रयाणां सहावस्थानम्। यच्च सन्निपातनाम्ना शास्त्रेषु प्रसिद्धम्। आधुनिकभिषग्भिः वर्तमाने काले सन्निपातप्रकृतिमान् पुरुषो न दृश्यते इत्यतः सन्निपातस्य नाधुना ग्रहणम्। तत्र वातलपित्तलकफलानां क्रमशः उच्चैस्तररूक्षगम्भीरादिध्वनिवैशिष्ट्यं तुम्बुरुमतानुगतं प्रोक्तम्।[३] तेषां प्रकृतप्रकरणानर्हत्वमित्यत्र नालोच्यते। परिनिष्ठितोऽर्थस्तु वातादिप्राधान्यात् श्रुतिः रूक्षगम्भीरादित्वमाप्नोतीति।

## नवधा श्रुतिः

नवधा श्रुतिरिति वेण्वादिनिष्ठतया मतम्। तत्र भरतवाक्योद्धरणेन वेणौ श्रुतेः नवधात्वं प्रकटयति। तत् कीदृशरीत्या प्रयोगाद् बोद्धु शक्नुम इति न वक्तुं शक्यते तादृशवेणोरभावात् तादृशवेणुपुनर्निर्माणाप्रसङ्गाच्च। अत्र विशिष्टपरीक्षा कर्तव्या वर्तते। या च भाविकालवर्तिनी।

## परिशिष्टमतानि

द्वाविंशतिसंख्यकाः श्रुतयः। एतत्कथनप्रसङ्गे तन्मतपोषकान् विशेषयति मतङ्गो मीमांसामांसलितधियः धीराः इत्येवम्।[४] मीमांसा सप्रमाणसुव्यवस्थितयुक्तिसंवलिता विचारणा तया मांसलितः परिपुष्टः धीः बुद्धिः शेमुषी येषां ते। तस्मात् एव धीराः धीसम्पन्ना बुद्धिमन्तः इति यावत्। एतेन विशेषशब्दप्रयोगसामर्थ्यात् एतस्मिन् मते ग्रन्थकृत्समर्थनमस्तीति स्फुटतया ध्वन्यते। धीराः एव एवं मतशालिनो भवितुमर्हन्तीत्याशयः। ननु एकैव श्रुतिरिति प्रसङ्गे मतङ्गस्य मामकीनं मतमिति किमिति चेत् तत्र सोपानाक्रामितपवनाश्रितत्तया एका एव श्रुतिः चतुःश्रुत्यादिभेदभिन्नः प्रतिभासते इत्युक्तमेव तेन। ननु श्रुतेः एकत्वमेव स्वीक्रियतां कथं द्वाविंशतिसंख्यकत्वमिति चेद् विषयविस्तरप्रसङ्गात् श्रुतेः द्वाविंशतिकत्वमेव साधु इत्येवात्राशयः। अन्यथा शास्त्रारम्भाप्रसङ्गः। यथा शास्त्रान्तरेऽपि एक एव वायुः पञ्चधेति तथात्रापि बोध्यम्।

एतद्विहायापि द्वाविंशतिश्रुतय एव मन्द्रमध्यतारभेदात् साकल्येन षट्षष्टिश्रुतयः इत्येके। तत्र एकस्यैव तत्त्वस्य मन्द्रादिभेदेन कल्पनातिशये अतिमन्द्रादिचिन्तने

[३] बृहद्देशी पृष्ठम् १२

[४] बृहद्देशी पृष्ठम् १२

कृते च अनवस्थाप्रसङ्गाद् दुष्टोऽयं पक्षः। अन्ये तु अनन्ता वै श्रुतिः। कथमिति चेत् चतुःश्रुत्यात्मकस्य षड्जस्य प्रत्येकं श्रुतिषु एकैकस्य मध्येऽपि शब्दस्थितिः अस्ति। तेन तेषामपि भवतु श्रुतित्वमिति पक्षः। चित्रे (३) यथा तृतीयतुरीयश्रुतिमध्ये सम्भावना प्रदर्शिता तथैवान्यत्रापि बोध्या। किन्तु तत्र तु मानुषश्रावणप्रत्यक्षे तादृशानां विशेषोपपत्तिर्न भवति प्रायः। तस्मात् शास्त्रव्यवस्थायां पक्षस्यास्य स्थितिर्न परिलक्ष्यते। क्वचित् देशीविषये अस्य प्रवर्तनं भवितुमर्हति। दृश्यते सम्प्रदायेषु यत् अमुके रागे शुद्धनिषादः उच्चैर्भवेत्। किन्तु कियदुच्चैर्भवेदिति न सर्वसाहमत्यम्। सम्प्रदायभागादपि तस्य वैचित्र्यमायातीति तत्र अनन्तश्रुतिस्वीकृतिः साफल्यं भजते इति मन्यते। तथापि अयं पक्षः शुद्धशास्त्रीयरीत्या ग्रहणे शास्त्रनैर्मल्यभङ्गप्रसङ्गः। यतः श्रुतयोऽपि सर्वाः स्वरसंवादस्थितिबलात् निष्पन्नाः। सङ्गीतस्वराणां च संवादस्थितिबलात् एतादृशाः द्वयोः प्रतिष्ठितश्रुतयोः मध्यस्थिताः श्रुतयः सिद्धान्तत्वेन स्वीक्रियन्ते चेत् संवादनाशविषयः। तेन नेष्टापत्तिः।




चित्रम् ३ - अनन्तश्रुतिसम्भावना

### द्वाविंशश्रुतिसिद्धान्तविमर्शः

श्रुतीनां चर्चाविषये तासां भरतसम्बन्ध एव सर्वत्र शास्त्रेषु। तत्र मुनिरेव प्रमाणम्। सन्ति प्रत्येकं श्रुतेः नामानि किन्तु तान्यत्र चर्चाविषयीभूतानि न भवन्ति। प्रतिश्रुति जातिचिन्तनमपि पूर्वैः कृतं, यस्य पर्यालोचनं रसोद्रेकप्रसङ्गे सुलाभदायकमिति अत्र न प्रस्तूयते।

तत्र द्वाविंशतिः श्रुतयः। चतुःश्रुतिकः षड्जः, मध्यमः, पञ्चमश्च। त्रिश्रुतिकः ऋषभः, धैवतश्च। द्विश्रुतिकः गान्धारः, निषादश्च। तथाहि भरतवचनं (नाट्यशास्त्रम् २८.२५-२६)–

चतुःश्रुतिर्भवेत् षड्ज ऋषभस्त्रिश्रुतिः स्मृतः।

द्विश्रुतिश्चैव गान्धारो मध्यमश्च चतुःश्रुतिः॥
पञ्चमस्तद्वदेव स्यात् त्रिश्रुतिर्धैवतो मतः।
द्विश्रुतिश्च निषादः स्यात् षड्जग्रामे विधिर्भवेत्॥ इति।

वर्तमानप्रचलितस्वरव्यवस्थायाः प्राचीनव्यवस्था बहुधा भिन्ना आसीत्। प्रस्तारे निर्दिष्टा नियतश्रुतिनिष्ठाः स्वराः शुद्धाः षड्जग्रामस्थाः। शुद्धस्यात्र तत्कालिकसहजनिष्पत्तौ अर्थवत्त्वम्। यथा वर्तमाने उत्तरभारतीये सङ्गीते वेलावलरागस्थस्वराः शङ्कराभरणरागस्थाः वा शुद्धा इति एतत्कालिकसहजनिष्पत्तिस्तेषाम्। [५]

विद्वद्भिर्बहुभिः स्वस्वविशिष्टाध्ययनसामर्थ्यात् श्रुतीनां स्थितौ किं प्रमाणं, कथं वा तेषां श्रवणार्हता इत्यादिचर्चाविस्तारः कृतः। तत्र विद्याधर-ओकमहोदयः, आचार्यकैलाशचन्द्रबृहस्पतिमहाभागः, आचरेकरमहाशयः इति प्रमुखाः श्रुतीनां ध्वनिपरिमाणे स्वकीयचिन्तां प्रस्तावितवन्तः। सङ्गीतरत्नाकरीयसारणाधारणया अध्यापकः विनोद-विद्वांस-वर्यः स्वकीये ग्रन्थे एवं प्रतिपादितवान् यत् नाट्यशास्त्रादिग्रन्थे यत् श्रुतेः प्रमाणता प्रदर्शिता तथा अपरेषां नास्ति। श्रुतेः प्रमाणं नाम द्वयोः श्रुत्योः मध्ये पार्थक्यं कियत् स्यात् तत्। पूर्वं ध्वनेः मानपरिमापणं नासीत्। तस्मात् इदम् अधिकमापकेन तस्य सम्पर्कोऽपि नोल्लिखितः। तेन श्रुतेः एकस्य मानं कम् इति भवति चेत् खमानकश्रुतिं प्रति गमने क्षपरिमाणातिक्रमो जायते (चित्रम् ४)। क्षपरिमाणा श्रुतिरेव प्रमाणा श्रुतिः इति श्रुतिप्रमाणम् (चित्रम् ४)। यद्वा एकश्रुतेः श्रुतिप्रमाणत्वम्। तस्मात् तथैव खश्रुतिगश्रुत्योर्मध्ये गश्रुतिघश्रुत्योर्मध्ये इत्यादि बोध्यम् (चित्रम् ४)।




चित्रम् ४ - प्रमाणश्रुतिमानबोधकम्

तस्मात् प्रमाणा श्रुतिर्नाम निर्दिष्टमानकश्रुतिः। प्रमाणस्य याथार्थ्यात्। तथाहि भरत आह–

मध्यमग्रामे तु पञ्चमः श्रुत्यपकृष्टः कार्यः। एवं स्वश्रुत्युत्कर्षाद् अपकर्षाद् वा यद् अन्तरं मार्दवाद् आयतत्वाद् वा तत् प्रमाणं श्रुतिः... इति। [६]

५ हिन्दुस्थानीयपद्धत्यां श्रुतिक्रमविपर्ययात्। शङ्कराभरणाख्यातो मेलः शुद्धः सुनिश्चितः॥
शुद्धमेलो हि सर्वत्र षड्जग्राम इतीरितः। शङ्कराभरणस्तस्मात् षड्जग्रामत्वम् अर्हति ॥ इति। (लक्ष्यसङ्गीते पृष्ठम् ११)

६ नाट्यशास्त्रम्, २८तमेऽध्याये पृष्ठम् २०

तत्र मतङ्गोऽपि स्पष्टं सानुवादं वक्ति–

ननु श्रुतेः किं मानम्? उच्यते पञ्चमस्तावद् ग्रामद्वयस्थो लोके प्रसिद्धः। तस्य श्रुत्युत्कर्षापकर्षाभ्यां मार्दवाद् आयतत्वाद् वा यद् अन्तरं तत्प्रमाणा श्रुतिरिति। इति। [७]

ग्रामद्वयं नाम षड्जग्रामः मध्यमग्रामश्च। षड्जग्रामे चतुःश्रुतिकः पञ्चमः, मध्यमग्रामे तु त्रिश्रुतिकः। तत्र पञ्चमस्य एकश्रुतिन्यूनान्यूनाभ्यां ग्रामद्वयप्राप्तिरासीत्। अन्यत्तु स्पष्टम्।

अथ सर्वथा स्पष्टीकरणाय भित्तिभूताः केचन विषया बोध्याः। द्विधा श्रुतीनां तात्पर्यावगतिर्भवितुमर्हति। एकधा तु प्रमाणश्रुतिपरिमाणतात्पर्यसहकृतसर्वश्रुत्यवस्थानज्ञानम्। अपरं तु तद्यथाविधि एकश्रुत्यन्तरतादिसाक्षात्काररूपं श्रुतीनां स्थितिज्ञानम्। प्रथमे तु ध्वनिपरिमापगणितसाहाय्यम् अलमिति द्वितीये तात्कालिकी वीणा। न हि प्रस्तुतप्रबन्धे ध्वनिपरिमाणसहकृतश्रुतिबोधे वाञ्छितफललाभः। यतो हि कथं ते पूर्वभूता मुनयः सङ्गीतज्ञाः श्रुतिं प्रापुरित्येव नः कौतूहलम्। तथापि कुतूहलनिरसाय, प्रसङ्गागतपक्षज्ञानाय, सहजेन च प्रत्नस्वरश्रवणार्हतया प्रथमपक्षः समासेन समुपस्थाप्यते।

**ध्वनिपरिमाणसहकृतश्रुतिज्ञानम्**

वर्तमाने स्वरयोः यः संवादः तथा सर्वत्र प्रत्नव्यवस्थायां नाभूत्। स्वरयोः संवादविषये प्राचीननियम एव प्रयुक्तो भवति। यश्च पुनः श्रुतिनिष्ठः। संवादपरिष्कारो वक्ष्यते। अधुना तु उपयोज्यवस्तुमात्रं कथ्यते। तथाहि कालऽस्मिन् ऋषभपञ्चमयोर्यः संवादः स पूर्वं नासीत्। आसीच्च पुनः मध्यमग्रामे। ननु मध्यमग्राम एव वर्तमानशुद्धस्वरस्थानमिति नैव। मध्यमग्रामे षड्जपञ्चमसंवादाभावात्। स च संवादो वर्तमाने वर्तते। तस्मात् स्वरस्थानपरिवर्तनं नूनं जातमिति सामान्यावलोकनेनावगम्यमाने सति विपश्चितः तात्कालिकीं श्रुतिं बोद्धु तत्पराः स्वराणां श्रुत्याश्रयत्वात्। आभातखण्डेविद्याधरौकपर्यन्तं बहवः अस्मिन् विषये कृतप्रयत्नाः, तादृशद्वाविंशतिश्रुतिस्थापने को वा न्याय आसीत्? कथं वा आसीत्? कीदृशं वा श्रूयेत? इत्यादिषु परिष्कारबुद्धिमन्तस्ते जाताः। तत्र आधुनिकवैज्ञानिकरीत्या गाणितकबुद्ध्या प्रतिपादनतत्परास्तेऽभवन्, विहाय आचार्यबृहस्पतिम्। तस्य तु प्रयोगोपकरणे त्रुटिरिति परं वक्ष्ये।

[७] बृहद्देशी पृ. १४




चित्रम् ५ - हर्जमापकयुतश्रुतिव्यवस्थायां स्वराणाम् अवस्थानम्

अत्र विनूतनं कार्यं किल विनोद-विद्वांस-वर्याणाम्। अस्मिन् प्रयोगमार्गे तेनैव निर्दिष्टं प्रमाणश्रुतितात्पर्यम्। स्वकीये ग्रन्थे अन्येषां विदुषां गाणितरीत्यवलम्बने प्रमाणश्रुतेः तात्पर्यविनिश्चयः सुष्ठुर्नाभूद् इति प्रदर्शितम्। तेषु तेषु श्रुत्यन्तरन्यायभङ्गात् सारणापुरःसरश्रुतिनिदर्शने द्वाविंशत्यधिकश्रुतिसम्भावनात् तेषां गतिर्नेष्टेति तस्य प्रतिपत्तिः।[८] तस्मात् प्रमाणश्रुतिः निश्चिता स्यात्। तस्याश्च सारूप्यं स्यात् सर्वत्र। तस्मादेव तस्याः प्रमाणत्वं याथार्थ्यम्। तत् तेन स्वविचारपरम्परया प्रतिष्ठितम्। यत्र प्रमाणश्रुतिमानं तद्दिशा– १.०३२ इति। एतदाधारेणैव प्रथमस्वरत्वेन षड्जस्य ग्रहणे तस्य परिमाणं २४० हर्त्समितं चेद् तदन्तरवर्तिनी श्रुतिः ततः १.०३२ गुणितं स्यादिति क्रमेण सर्वश्रुतिप्राप्तिः।[९] तथाह्येतत् निर्गलितश्रुतिपरिमाणसहितचित्रावलोकनेन स्पष्टं भवति (चित्रम् 5)।

## यथारीति श्रुतिव्यवस्थाबोधः

स्वरः नैसर्गिकतया मानुष्यां बुद्धौ तिष्ठति। स्वराणां संवादरीत्या एव एकस्मात् अपरस्वरलाभो भवति। तत्र ध्वनिपरिणामचिन्ता अधिका। स्वरलाभे एव प्रयोगफललाभात्। ध्वनिपरिणामलाभे यान्त्रिकबुद्धिप्रसङ्गादौ फललाभो नात्र विषय इति स पक्षः स्वस्थानस्थ एव भवतु नात्र युज्यते प्राथमिकतया। किञ्च, ये केचिद् एतत्कालपर्यन्तं श्रुतिप्राप्तौ सारणाप्रयोगं निर्देशितवन्तः तेषां सारणाशब्देन वर्तमानतन्त्रीसारणाबोधे एव भरतश्रुतिप्राप्तौ सहजस्थितिभङ्गः अभूत्। सिताररुद्रावीणादीनां अलाबूवीणान्तर्गतता। किन्तु श्रुतिनिदर्शनं क्वचिदपि स्पष्टतया अलाबूवीणायां भवितुं नार्हति। भारतेऽपि नाट्यशास्त्रे

---

८ दृश्यताम् Vidwans, 2016, pp. 90-93

९ तत्रैव, pp. 93-97
(The correct value of Bharata's Pramana Shruti is 1.0320082797342096315932407419543, derived from the equal temperament 22 shruti scale. This value represents the correct interpretation of Natyashastra and Sangita Ratnakar and is valid in all respects. Pramana Shruti ratio: 22nd root of 2 = 1.0320082797342096315932407419543– (1.032), this is the correct value of the Pramana Shruti of Bharata.…)

मूलवीणात्वेन दण्डवीणाया न, अपि च वर्तमाने आङ्ग्ले 'harp' इति शब्देन यादृशस्य यन्त्रस्य अर्थवत्त्वं तादृश्यस्य ग्रहणम्। सारणा शब्दस्तु वीणालग्नतन्त्रीसरणरीत्युपस्थापकतया प्रयुक्तः। तत्र सर्वासां तन्त्रीणां सामान्यं नाम वीणेति। अनलाबूवीणानां सामान्यतः अङ्गवीणाख्या वक्रावीणेति वा नाम। यासाम् आङ्ग्ले harp इत्याख्या भवितुमर्हति। किन्तु पाश्चात्यानां यन्त्रात् भारतीया वक्रवीणा भिद्यन्ते स्म बहुधा। भारतभूमौ तथा च ब्रह्मदेशादिषु तादृशवीणानां साम्यं वर्तते, पाश्चात्याभिश्च ता भिद्यन्ते। तथाहि नान्यभूपालस्य स्पष्टीकरणं भरतभाष्यापरनामधेये सरस्वतीहृदयालङ्कारे (१.८४-८८)–

दारवी या तु तत्रापि नाम तन्त्री समन्विता।
वक्रा कौर्मी तथाऽलाबू त्रीण्यङ्गानि भवन्ति वै॥

विपञ्ची वल्लकी मत्तकोकिला च प्रकीर्तिता।
चित्रा सारस्वती चैव गान्धर्वी ब्राह्मिकेत्यपि॥

एवमादीनि वक्त्रायाः प्रत्यङ्गानि श्रुतानि वै।
ततः संवादिनी ज्ञेया तथैव परिवादिनी॥

वल्लीसका तु किन्नरी कौर्म्या अन्यैवमादयः।
विज्ञानो नकुला चेद् अङ्गानि च मनीषिभिः॥

अलाबू कौर्म्या वीणायाः प्रत्यङ्गानि प्रचक्षते।
इत्येवमादयो भेदा दारव्याः समुदाहृताः॥ इति।

तेन वक्रवीणायाः अङ्गवीणात्वम्, अपरासाम् अलाबूकौर्मीणां प्रत्यङ्गत्वम् अङ्गसहकारित्वं, तेन च स्वत एव अङ्गानां मुख्यत्वं सिद्ध्यति। तत्रापि मत्तकोकिलायाः सुनिश्चितमुख्यता इति अभिनवगुप्तवचनाद् ज्ञायते। परं चोद्ध्रीयते।

ननु अलाबूवीणायां श्रुतिर्न प्रकाश्यते वेति चेत् प्रकाश्यते गमकयोगेन न तु स्वतन्त्रतया एकस्यां तन्त्र्यां बहुस्वरोद्गसम्भावनात्। किन्तु स्वतन्त्रतया प्रकाशः वक्रवीणास्वेव सम्भवः स्वराणां श्रुतीनां वा तन्त्र्यैकस्थितित्वात्। किञ्च, युक्तषड्जस्य अलाबूवीणाया एकस्मिन् तन्त्रे स्थापने अपि सारणायाम् अङ्गुलिनोदनेन अपरस्वराभिव्यक्तौ नियमेन सार्धश्रुतिवृद्धिर्जायते येन परम्परानुगवादनरीतिम् ऋते यथार्थश्रुतिनिष्पत्तिर्दुरूहा। अपि च सर्वथा अलाबूवीणासु एकतन्त्रीकिन्नर्यादिषु श्रुतिप्रदर्शनदृष्टान्ताभाव एव दृश्यते। ननु किं तर्हि वेङ्कटमखिनः इति चेत् तावता तु प्राचीनभरतरीतिभङ्ग एव। अस्माकं तु दशमैकादशख्रीष्टाब्दपूर्वतनश्रुतिस्थितौ एवाग्रहः। परं

तु परम्पराभङ्ग इति विदुषामाशयः।[१०] अङ्गवीणास्वपि मत्तकोकिलायाम् एकविंशतितन्त्रीयुतायां स्पष्टतया श्रुतयः प्राप्यन्ते तन्त्रीबाहुल्यात् बोधसौकर्यं तत्र। तथा हि अभिनवगुप्तपादो अभिनवभारत्याम् आह–

तत्र मत्तकोकिला प्रधानभूता। एकविंशतितन्त्रीकत्वेन अन्यूनाधिकं त्रिस्थानस्वरसारणाजातिगीतिवीणाशरीरम् उच्यते इति।[११]

पुनश्च तत्रापि वैपञ्चिको वैणिकश्च इति[१२] भरतवाक्यस्थवैणिकपदस्य वीणावादकार्थकस्य का वीणेति प्रश्ने आह अभिनवगुप्तपादः वीणा तु एकविंशतितन्त्रीका इति।[१३] एतेन केवलवीणापदेन मत्तकोकिलायाः प्राप्तिः सर्वमुख्यत्वद्योतकता च। मुख्यत्वात् सामान्याभिधानेन विवक्षाशान्तिः, अन्यत्र वैपञ्चिक इति विशेषसंज्ञा प्रयोजनपुरःसरा। अपि तेनैव निर्दिष्टं यत् विपञ्ची तु अपूर्णतन्त्रिका इति।

भरतस्य[१४] श्रुतिव्यवस्थायां संवादपरिलक्षणेनैव स्वरप्राप्तिर्जायते। ततः पूर्वं ग्रामविषयकज्ञानं सामान्यमावश्यकम्। लौकिकप्रयोगार्हौ द्वौ ग्रामौ भवतः। षड्जग्रामो मध्यमग्रामश्च। ग्रामो नाम यथा लोके जनसमूहः, तथैव सङ्गीतशास्त्रे विशिष्टस्वरसमूहो ग्राम इति पारिभाषिकं पदम्। द्वौ एव सप्तक्रमस्वरसंवलितौ। तत्र षड्जग्रामस्था ये स्वरास्ते एव शुद्धाः इति समयः। तत्र षड्जे ग्रामे स्वराणां येषां मिथः संवादो भवति स चैवं– षड्जमध्यमयोः, षड्जपञ्चमयोः, ऋषभधैवतयोः, गान्धारनिषादयोश्च।[१५] कथमिति चेत् नवकत्रयोदशकश्रुत्यन्तरप्रामाण्यात् द्वयोः स्वरयोर्मिथः संवादः इति क्रमशो ज्ञायते। संवादेषु षड्जमध्यमसंवादः इदानीमपि लोके प्रसिद्धः। उत्तरभारतीये दुर्गादिरागेषु संवादोऽयं प्रसिद्धः। तेन षड्जमध्यमौ संवादस्थौ वर्तमानरूपौ एव स्तः इति षड्जमध्यमौ प्राप्तौ (चित्रम् ६)। षड्जमध्यमयोः नवश्रुत्यन्तरसंवादः। तत्र मध्यमनिषादयोरपि

---

१० Indian music before the 10th century was of a kind which we may today even find difficult to understand, because we are no longer familiar with the nuances of that tradition. (P. Bhattacharya, & S. Chowdhury, 2021)

११ नाट्यशास्त्रम्, पृष्ठम् १२२

१२ नाट्यशास्त्रम्, २८.४ ग

१३ तत्रैवाभिनवभारतीटीकायाम्, पृष्ठम् ३

१४ भरतस्य श्रुतिव्यवस्था इति भरतसम्बन्धः, तेनैव व्यवस्थितमिति एकः पक्षः मुनित्वात् आप्तत्वात्। यद्वा, लौकिके प्रयुक्तानां गीतस्वराणां सम्बन्धकल्पनायाम् उद्भूतः यौक्तिकः कश्चन क्रमः यस्य आदिमोपस्थितिरेतावता नाट्यशास्त्रे एव प्राप्यते इत्यस्मात् भरतसम्बन्धकल्पना।

१५ तद्यथा– षड्जपञ्चमौ ऋषभधैवतौ गान्धारनिषादवन्तौ षड्जमध्यमौ इति षड्जग्रामे इति नाट्यशास्त्रम्, २८तमेऽध्याये, पृष्ठम् १५

तथैवेति मध्यमं षड्जत्वेन गणयामश्चेत् ततः मध्यमोच्चारणेन भरतस्य निषादप्राप्तिर्भवति (चित्रम् ६)। एवं मध्यमनिषादसंवादः क्वचिदपि वर्तमाने नास्तीति निषादस्य वैलक्षण्यमपि प्राप्तम्। षड्जपञ्चमसंवादस्तु बहुप्रसिद्धः लोके। अयं पुनः संवादः प्राचीनेऽपि श्रुतिव्यवस्थायाम् आसीत्। तस्मात् षड्जपञ्चमसंवादवशात् आदौ पञ्चमप्राप्तिः (चित्रम् ६), ततश्च निषादस्य पञ्चमत्वे अवरोहणक्रमेण षड्जरूपगान्धारप्राप्तिः (चित्रम् ६)। अयं गान्धारः भरतस्य विलक्षणः। अधुनाप्रसिद्धः दाक्षिणात्यः अन्तरगान्धारः, यश्च उत्तरे शुद्धगान्धारनाम्ना तीव्रगान्धारनाम्ना वा प्रसिद्धः, स प्रत्नश्रुतिव्यवस्थायामपि अन्तरगान्धारः (चित्रम् ६)। यद्यपि सप्तश्रुत्यन्तरतायां संवादो न जायते तथापि सहजं षड्जान्तरगान्धारभावम् आदाय मध्यमस्य षड्जत्वस्वीकारेण अन्तरगान्धाररूपेण भरतस्य धैवतप्राप्तिरस्ति सप्तश्रुत्यन्तरत्वात् (चित्रम् ६)। एवञ्च, षड्जपञ्चमसंवादबलात् प्राप्तस्य धैवतस्य पञ्चमत्वस्वीकारेण अवरोहणक्रमे षड्जरूपः भरतस्य त्रिश्रुतिक ऋषभः प्राप्यते (चित्रम् ६)। एवं प्रत्नश्रुतिव्यवस्थायाः सर्वस्वरापत्तिः। चित्रस्य (६) अवलोकनेन नितान्तस्पष्टता स्यात्।

एवं प्राप्ते सति एकविंशतितन्त्र्यात्मिके द्वे मत्तकोकिलवीणे स्वीक्रियेते भरतमुख्यवीणात्वात्। द्वे वीणे इत्यादिभरतवाक्ये तात्पर्यनिश्चयः। तथाहि–

...निदर्शनं तु आसाम् अभिव्याख्यास्यामः। यथा द्वे वीणे तुल्यप्रमाणतन्त्र्युपवादनदण्डमुर्च्छने कृत्वा षड्जग्रामाश्रिते कार्ये। तयोरन्यतरस्यां पञ्चमस्य अपकर्षे श्रुतिं मध्यमग्रामिकीं कृत्वा ताम् एव च पञ्चमस्य श्रुत्युत्कर्षवशात् षड्जग्रामिकी कुर्यात्। एकश्रुतिरपकृष्टा भवति। पुनरपि तद्वदेवापकर्षेत् यथा गान्धारनिषादवन्तौ इतरस्याम् ऋषभधैवतौ प्रवेक्ष्यतः द्विश्रुत्यधिकत्वात् पुनरपि तद्वद् एव अपकृष्टायां धैवतार्षभौ इतरस्यां पञ्चमषड्जौ प्रवेक्ष्यतः त्रिश्रुत्यधिकत्वात्। तद्वत्पुनः अपकृष्टायां पञ्चममध्यमषड्जा इतरस्यां मध्यमगान्धारनिषादवन्तः प्रवेक्ष्यन्ति चतुःश्रुत्यभ्यधिकत्वात्। एवमेतेन श्रुतिनिदर्शनेन द्वौ ग्रामिक्यौ द्वाविंशतिश्रुतयः प्रत्यवगन्तव्या।इति। [१६]




चित्रम् ६ - लौकिकसंवादबलात् प्रत्नश्रुतिस्थस्वरप्राप्तिः [१७]

---

१६ नाट्यशास्त्रम्, २८तमेऽध्याये पृष्ठम् २०

१७ अस्मिन् प्रस्तारे अगेति अन्तरगान्धारस्य संकेतः। रक्तवर्णः षड्जमध्यमसंवादपरिचायकः।

अथ चास्य भरतनिर्दिष्टश्रुतिनिदर्शनस्य अभिव्याख्यानस्य यथायोग्यमर्थपरिष्कारः सरलतया क्रियते। आसामिति श्रुतीनां निदर्शनं प्रत्यक्षतया प्रापणं श्रवणम् इति यावत्। यस्याः श्रुतेः चलत्वमापन्नं तस्याः चलवीणेति संज्ञा। अपरस्य तु सदास्थैर्याद् ध्रुववीणेति संज्ञा। अथ पञ्चमस्य एकश्रुतिन्यूनतायाम् अपरयथायोग्यश्रुतिसहकारेण पुनः चलवीणायां षड्जग्रामस्थापना स्यात्। एतेन ध्रुववीणापेक्षया चलवीणायाः स्वराः सर्वे एकश्रुतिहीनाः। ध्रुववीणायां चतुर्थसप्तमनवमत्रयोदशसप्तदशविंशद्वाविंशश्रुतीनां निदर्शनं तु स्वराणां तदाश्रयत्वाद् भवत्येव। किन्तु चलवीणायाः एकश्रुतिहीनत्वे तृतीयषष्ठाष्टमद्वादशषोडशोनविंशैकविंशश्रुतीनां प्राप्तिर्जायते (चित्रम् ७, ८ च)।

अथ गान्धारनिषादौ ध्रुववीणापक्षतः एकश्रुतिहीनौ पुनः एकश्रुत्या हीयेते चेत् ध्रुववीणास्थगान्धारनिषादापेक्षया द्विश्रुतिहीनतां प्राप्नुवतः। एतदाधारेण अन्या अपि श्रुतयः संवादानुरोधेन पुनः हीयमानाश्चेत् चलवीणायां पुनः षड्जग्रामप्राप्तिः। अधुना खलु ध्रुववीणापेक्षया द्विश्रुतिहीनेयं वीणेति द्वितीयपञ्चमसप्तमैकादशपञ्चदशाष्टादशविंशश्रुतीनां प्राप्तिः (चित्रम् ७, ८ च)।

तदनु पुनः ध्रुववीणापक्षतः द्विश्रुतिहीनौ ऋषभधैवतौ एकश्रुत्या हीयेते चेत् ध्रुववीणास्थऋषभधैवतापेक्षया त्रिश्रुतिहीनतां प्राप्नुवतः। एतदाधारेण अन्या अपि श्रुतयः संवादानुरोधेन पुनः हीयमानाश्चेत् चलवीणायां पुनः षड्जग्रामप्राप्तिः। तेन ध्रुववीणापेक्षया त्रिश्रुतिहीनेयं चलवीणेति प्रथमचतुर्थषष्ठदशमचतुर्दशसप्तदशोनविंशश्रुतीनां प्राप्तिः (चित्रम् ७, ८ च)।

ततश्च ध्रुववीणापक्षतः त्रिश्रुतिहीनाः षड्जमध्यमपञ्चमा एकश्रुत्या हीयेते चेत् ध्रुववीणास्थषड्जमध्यमपञ्चमापेक्षया चतुःश्रुतिहीनतां प्राप्नुवन्ति। एतदाधारेण अन्या अपि श्रुतयः संवादानुरोधेन पुनः हीयमानाश्चेत् चलायां पुनः षड्जग्रामप्राप्तिः (चित्रम् ७, ८ च)।

एवञ्च ध्रुववीणापेक्षया त्रिश्रुतिहीनायां चलवीणायां मन्द्रद्वाविंश-तृतीयपञ्चमनवमत्रयोदशषोडशाष्टादशश्रुतीनां प्राप्तिरिति सकलद्वाविंशति-श्रुतिनिर्दशनं प्रत्यक्षतया जायते। तत्र मन्द्रद्वाविंशेति मन्द्राक्रान्तद्वाविंशश्रुतेः पुनरावृत्तौ न तस्या गणना (चित्रम् ७, ८ च)।

एवं मूलानुगतार्थविस्तारैः परम्परागतश्रुतिनिदर्शनरीतेः परिष्कारो जातः। चित्रद्वयमिलितस्यास्य पाठे नूनं बोधसुगमता स्यात्। मतङ्गग्रन्थे एवादिमतया श्रुतिनिर्देशप्रस्तारो दृश्यते। चित्रे (८) भरतोक्तदिशा परम्परानुगा श्रुतिनिदर्शना

---

हरितवर्णः षड्जपञ्चमसंवादस्य। नीलश्च षड्जान्तरगान्धारभावद्योतकः इत्येवं बोध्यम्।

प्रयोगे द्वाविंशतिश्रुतिश्रवणतां प्रतिपादयतीति अङ्कैः प्रतिपादितम्। तत्र रेखाकर्तितरक्तिमाङ्काः पूर्वश्रुतश्रुतिबोधकत्वात् त्यक्ता गणने इति बोध्यमित्यन्यथा न चेष्टापत्तिः (चित्रम् ८)। एवं द्वाविंशतिश्रुतिश्रवणता सिद्धा भवति (चित्रम् ८)। तेनैव च ध्वनिपरिमाणरीत्यैव श्रुतिनिर्णयः स्यादिति पक्षे उत्थापिते निरस्ता स्यात्। श्रुतिनिर्णये श्रुतिश्रवणे च ध्वनिपरिमाणनिरूपणस्यायोगताऽपि सिद्धा।

| श्रुतिसंख्या | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **ध्रुववीणा** | | | | **स** | | | **रि** | | **ग** | | | | **म** | | | | **प** | | | **ध** | | **नि** | स |
| **चलवीणा** | | | | स | | | रि | | ग | | | | म | | | | प | | | ध | | नि | स |
| **प्रथमसारणा** | | | स | | | रि | | ग | | | | म | | | | प | | | ध | | नि | | |
| **द्वितीयसारणा** | | स | | | रि | | ग | | | | म | | | | प | | | ध | | नि | | | |
| **तृतीयसारणा** | स | | | रि | | ग | | | | म | | | | प | | | ध | | नि | | | | |
| **चतुर्थसारणा** | | | रि | | ग | | | | म | | | | प | | | ध | | नि | | | | स | |

द्विश्रुत्यन्तरता त्रिश्रुत्यन्तरता चतुःश्रुत्यन्तरता

चित्रम् ७ - मतङ्गानुगश्रुतिनिदर्शना

| ध्रुववीणावस्था षड्जग्रामे | | | | | 4 | | | 7 | | 9 | | | | 13 | | | | 17 | | | 20 | | 22 | श्रुतश्रुतिसंख्या |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **अवस्था** | **श्रुतिस्थानाङ्कः** | **1** | **2** | **3** | **4** | **5** | **6** | **7** | **8** | **9** | **10** | **11** | **12** | **13** | **14** | **15** | **16** | **17** | **18** | **19** | **20** | **21** | **22** | |
| **ध्रुववीणासमा** | **चलवीणाश्रुतिलाभः** | | | | 4 | | | 7 | | 9 | | | | 13 | | | | 17 | | | 20 | | 22 | 7 |
| **एकश्रुत्यपकृष्टा** | | | | 3 | | | 6 | | 8 | | | | 12 | | | | 16 | | | 19 | | 21 | | 7 |
| **द्विश्रुत्यपकृष्टा** | | | 2 | | | 5 | | ~~7~~ | | | | 11 | | | | 15 | | | 18 | | ~~20~~ | | | 5 |
| **त्रिश्रुत्यपकृष्टा** | | 1 | | | 4 | | 6 | | | | 10 | | | | 14 | | | 17 | | 19 | | | | 3 |
| **चतुःश्रुत्यपकृष्टा** | | | | ~~3~~ | | ~~5~~ | | | | ~~9~~ | | | | ~~13~~ | | | ~~16~~ | | ~~18~~ | | | | ~~-22~~ | 0 |
| साकल्येन श्रुतश्रुतयः | | | | | | | | | | | | | | | | | | | | | | | | 22 |

चित्रम् ८ - भारतश्रुतिनिदर्शनायां सकलश्रुतिलाभः

ननु विशेषकार्येषु ध्वनिनिरूपणप्रङ्गे सति किमिति चेत् प्रयोजनानुग्रहे कस्य वा निषेधो भवति? ननु यत्र निरूपणप्रकार उक्तस्तत्र विपरीतप्रकाराश्रयः कथमिति चेत् न तथा सर्वथा। तथाहि आचार्यबृहस्पतिः परिमाणानुगततां हित्वैवाकरोत् निर्णयप्रयासम्। किन्तु तेन तु सितारवाद्यं विशेषीकृततानपूरिकां स्वीकृत्य निर्देष्टुमुद्यत इति भ्रम आसीत्। यत्र जयदेवसिंहविदुषा प्रत्नभारते धनुर्वीणादिविषये निर्णयिना स्थीयते, अपि च भरतभाष्यस्य हिन्दीटीकायां चैतन्यदेसाईवर्योऽपि धनुर्वीणासादृश्यं भरतकालीनवीणानां निश्चयं करोतीति कथं तत्र सर्वैः विजातीयवाद्येषु, अभिनववाद्यनिर्माणेषु रता इति संशयो नः। किञ्च, १९३० तमे वर्षे आनन्दकुमारस्वामिवर्येण प्राक्तनाङ्ग्लगवेषकाणां कल्पनां विनश्य

वीणाशब्देन प्राचीनभारते वक्रा वीणा एव प्राथम्येन बुध्यते स्मेति स्वकीये प्रबन्धे प्रथमतया प्रतिपादितम् (चित्रम् ९)।



चित्रम् ९ - रेखाचित्रं वीणायाः कुमारस्वामिपत्रस्थायाः

यद्वास्तु, कलामण्डलपियालभट्टाचार्यवर्येण साम्प्रतं ब्रह्मदेशतः तद्देशवक्रवीणागुरुणा वीणावादनशैलीं स्वछात्राय शिक्षापयित्वा अस्मद्देशवाद्यनिर्माणशिल्पिषु वक्रवीणाविषयकनिर्माणोपयोगिज्ञानाभावात् तद्देशवक्रवीणानिर्माणशिल्पिभिः शास्त्रोक्तमत्तकोकिलादिवीणास्वरूपानुगुण-यथासम्भववीणाः निर्मापयित्वा (चित्रम् १०) भारतम् आनीय भरतविवक्षानुरूपप्रयोगः कृतः, स्वस्योपरूपकादिप्रयोगे ता अधिमञ्चं व्यवहृता इति पूर्वरूपसंदेहदोलाचलो नूनं न्यूनितः। एतत्प्रबन्धकर्त्रा तेन पुनर्विन्यस्ताः वीणाः दृष्ट्वैव षड्जस्य अस्थिरत्वे मानं, वादिस्वरमाहात्म्यं जातिष्वित्यादि बुद्धम्। तस्मात् नितरां ते कृतज्ञताभाजः। अपि च विशेषकार्यं विहाय प्रशस्ततया भरतानुगपद्धत्या एव श्रुतिनिरूपणे श्रम एव अलमिति तत एव निश्चितम् इति ध्वनिपरिमाणादिपक्षः नात्र स्वीकृतः। तदुपस्थानं तु प्रसङ्गस्वारस्यात्।



चित्रम् १० - कलामण्डलपियालभट्टाचार्यपुनर्विन्यस्ता मत्तकोकिला

ध्वनिपरिमाणनिरूपणेऽपि अस्ति नूनं प्रयोजनमाधुनिके विश्वे। विनोदविद्वांस्-वर्यस्तु श्रुतियाथार्थ्यज्ञानेन संगणकयान्त्रिकबुद्ध्या

हिन्दुस्तानीसङ्गीतरागान् सम्भावयितुकामः। अपरे न आलोचनार्हास्तेषाम् अपरभाविविनोदमहाशयकर्तृकतत्तच्छ्रुतिप्रमाणबोधन्यक्कारात्।



चित्रम् ११ - वीणावादनरतसमुद्रगुप्ताङ्कितमुद्रा

**प्रत्नश्रुतिस्थस्वराः**

शुद्धश्च विकृतश्च द्वौ स्वरौ। शुद्धाः षड्जऋषभगान्धार-मध्यमपञ्चमधैवतनिषादरूपसंज्ञां भजन्ते। तेषां तु श्रुतिपर्यालोचनेनैव समाख्यानात् न पृथगुल्लेखः। विकृताः च्युतषड्जादिसंज्ञावन्तः। पूर्वमेव शुद्धस्वरकथनं जातमिति साक्षात् विकृता एव स्वरा उच्यन्ते। विकृतेषु मध्यमग्रामिकः त्रिश्रुतिकः पञ्चमः च्युतपञ्चमकैशिकपञ्चमापरपर्यायो ज्ञातः, तथा च पञ्चमस्य एकां श्रुतिं स्वीकृत्य स्थितः चतुःश्रुतिकधैवतोऽपि (प्रस्तारः १)। अधुना तावत् विस्तार्यते।

नाट्यशास्त्रे बृहद्देश्यां विकृतस्वराणां पृथग्विवरणक्रमेण समुल्लेखो नास्ति। तानादिप्रयोगप्रसङ्गे तेषां सामान्यवचनैरुल्लेखे कृते एव तत्र वाक्यशान्तिः। तथाहि नान्यनृपतेः सरस्वतीहृदयभूषणे एव पृथक्तया कारिकाभिः काकल्यन्तरसाधारणस्वराणामुल्लेखः कृतः। किन्तु त्रुटितवाक्यबाहुल्यात् स ग्रन्थो नास्माकमधिकसहायभूतः। तस्मात् विस्पष्टं यत्र प्राप्यते विकृतस्वरख्यापनं सुष्ठु कारिकाभिः स सङ्गीतरत्नाकर एवानुसृतोऽस्तु। तथाह्याह निःशङ्कः शार्ङ्गदेवः–

च्युतोऽच्युतो द्विधा षड्जो द्विश्रुतिर्विकृतो भवेत्।
साधारणे काकलीत्वे निषादस्य च दृश्यते॥

साधारणे श्रुतिं षाड्जीम् ऋषभः संश्रितो यदा।
चतुःश्रुतित्वमायाति तदैको विकृतो भवेत्॥

साधारणे त्रिश्रुतिः स्याद् अन्तरत्वे चतुःश्रुतिः।

गान्धार इति तद्भेदौ द्वौ निःशङ्केन कीर्तितौ॥
मध्यमः षड्जवद् द्वेधान्तरसाधारणाश्रयात्।
पञ्चमो मध्यमग्रामे त्रिश्रुतिः कैशिके पुनः॥
मध्यमस्य श्रुतिं प्राप्य चतुःश्रुतिरिति द्विधा।
धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः॥
कैशिके काकलीत्वे च निषादस्त्रिचतुःश्रुतिः।
प्राप्नोति विकृतौ भेदौ द्वाविति द्वादश स्मृताः॥

(सङ्गीतरत्नाकरः, १.३.४०-४५) इति।

प्रस्तारः १- प्राचीनविकृतस्वरस्थाननामानि

| **श्रुतिसंख्या** | **शुद्धस्वरः** | **विकृतस्वरः** |
|---|---|---|
| १ | | कैशिकनिषादः (षड्जसाधारणे) |
| २ | | काकलीनिषादः |
| ३ | | च्युतषड्जः षड्जसाधारणो वा |
| ४ | षड्जः | अच्युतषड्जः (काकलीनिषादे) |
| ५ | | |
| ६ | | |
| ७ | ऋषभः | चतुःश्रुतिकः ऋषभः (षड्जसाधारणे) |
| ८ | | |
| ९ | गान्धारः | |
| १० | | साधारणगान्धारः (मध्यमसाधारणे) |
| ११ | | अन्तरगान्धारः |
| १२ | | च्युतमध्यमः मध्यमसाधारणो वा |
| १३ | मध्यमः | अच्युतमध्यमः (अन्तरगान्धारे) |
| १४ | | |
| १५ | | |
| १६ | | च्युतपञ्चमः (मध्यमग्रामे), कैशिकपञ्चमः (मध्यमसाधारणे) |
| १७ | पञ्चमः | |
| १८ | | |
| १९ | | |
| २० | धैवतः | चतुःश्रुतिकः धैवतः (मध्यमग्रामे) |
| २१ | | |
| २२ | निषादः | |

तथाहि विस्तार एषामेवं बोध्यः– द्विश्रुतिकः सन् षड्जः द्विधा विकृतो भवति। साधारणे इति षड्जसाधारणे सति इत्यर्थः। साधारणं किम्? द्वयोः स्वरयोः मध्यवर्तिनः स्वरस्य द्वाभ्यां किल समानसंख्यकश्रुतिग्रहणात् मध्यस्थस्य स्वरस्य साधारणसंज्ञा स्यात्। तेन कैशिकनिषादावस्थायां निषादेन षड्जस्य आदिमश्रुतिग्रहणेन, ऋषभेण च अन्तिमश्रुतिग्रहणेन षड्जस्य षड्जसाधारणसंज्ञा। एवं गान्धारेण मध्यमस्य आदिमश्रुतिग्रहणेन, पञ्चमेन च अन्तिमश्रुतिग्रहणेन मध्यमस्य मध्यमसाधारणसंज्ञा। तत्र षड्जमध्यमसाधारणता स्वस्वग्रामयोरेव इति समयः। षड्जसाधारणता षड्जग्रामे, मध्यमसाधारणता च मध्यमग्रामे इति विवेकः। मध्यमसाधारणे विकृतसंज्ञादिकमग्रे वक्ष्यते।

चतुःश्रुत्यापन्ने ऋषभे सति च्युतषड्जः षड्जसाधारणं वेति संज्ञा विकृतषड्जस्य। निषादस्य काकलीत्वे सति निषादः षड्जस्य द्वितीयां श्रुतिं स्वीकरोति, तस्मात् चतुःश्रुतिहीनत्वात् विकृतत्वं षड्जस्य द्विश्रुतिकस्य। किन्तु स्वस्थानाद् अच्युत इति अच्युतषड्ज इति संज्ञा। एवं षड्जस्य द्वयोः विकृतावस्थायामेव श्रुतिद्वयात्मकत्वं गम्यते। साधारणे इत्यादिकं तु ऋषभस्य चतुःश्रुतिमत्त्वात् विकृतता उक्ता।

गान्धारस्य द्वौ भेदौ भवतः। यथा– साधारणे इति मध्यमसाधारणे पूर्वोक्तलक्षणे मध्यमग्रामे गान्धारः मध्यमस्य आदिमश्रुतिं स्वीकरोति तेन त्रिश्रुतिकस्य गान्धारस्य विकृतता साधारणगान्धार इति वा संज्ञा। अपि च गान्धारः यदा मध्यमस्य द्वितीयां श्रुतिं गृह्णाति, तदा विकृतस्य चतुःश्रुतिकस्य गान्धारस्य अन्तरगान्धार इति संज्ञा भवति। एवं षड्जवत् मध्यमोऽपि द्विधा विकृतो भवति। साधारणगान्धारे सति मध्यमसाधारणे पञ्चमेन मध्यमस्य अन्तिमश्रुतिस्वीकारात् मध्यमः एकश्रुत्या च्युतः सन् च्युतमध्यम इति विकृतावस्थायां संज्ञां धत्ते। किञ्च, अन्तरगान्धारे सति मध्यमः स्वस्थानात् अच्युतोऽपि त्रिश्रुतिक इति विकृतस्य तस्य अच्युतमध्यमसंज्ञा।

पञ्चमो हि मध्यमग्रामे त्रिश्रुतिकः सामान्यत एव विकृतः। तथा च मध्यमसाधारणे तस्य चतुःश्रुतिकत्वे कैशिकपञ्चम इति संज्ञा। तेन द्विविधो हि विकृतपञ्चमः। मध्यमग्रामे पञ्चमस्य एकश्रुत्या हीनत्वे त्रिश्रुतिकस्य शुद्धस्य धैवतस्य चतुःश्रुतिकत्वात् तस्य विकृतता। षड्जसाधारणे निषादस्य काकलीत्वे विकृतता तु पूर्वमुक्तम्। तत्र तस्य चतुःश्रुतिकता। किञ्च निषादो यदा त्रिश्रुतिको भवति तदा तस्य कैशिकनिषाद इति संज्ञा।

एवं षड्जस्य द्वौ, ऋषभस्य एकः, गान्धारस्य द्वौ, मध्यमस्य द्वौ, पञ्चमस्य च द्वौ, धैवतस्य एकः, निषादस्य द्वौ इति द्वादश विकृताः स्वराः प्राचीनव्यवस्थायां यथासंज्ञं ज्ञेयाः। प्रस्तारसहकृतपाठे एतेषां बोधः सुलभः स्यात्।

## उपसंहारः

सङ्गीतरत्नाकरात् नाट्यशास्त्रात् सङ्गीतविषयं पठित्वा वर्तमानस्वरादिविषये साक्षात् अनालोच्य आप्तवचनरूपेण न्यसनं प्रमादभूयिष्ठं स्याद् इति अवबोधः एतावता भवेत्। यतः तत्र ये षड्जादयः स्वरा उक्ताः, श्रुतयश्च या निरूपिताः, तेषां निरूपणस्य आधारभूतं लक्ष्यं सर्वथा अर्वाचीनलक्ष्याद् वैलक्षण्यं भजते। अपि च, वर्तमाने समये श्रुत्याधारितरीत्या स्वरविकृततां न वदामः। यथा प्राचीने च्युताच्युतभेदवान् षड्जः इत्यादि। किन्तु वर्तमाने तु सुनिर्धारितश्रावणप्रत्यक्षविलक्षणरूपस्वराणां सुनिर्धारितशुद्धविकृतभावं स्वीकुर्मः। अतः कथञ्चिदपि प्राचीने शास्त्रे षड्जर्षभादिविषये यद् यद् उक्तं तत् तत् आमूलतया अर्वाचीनलक्ष्ये सम्भवेत्। तस्मात् अस्ति अत्र अतिसूक्ष्मविचारसम्भावना प्राचीनार्वाचीनश्रुतिस्वरसादृश्यासादृश्यविमर्शे। अपि च बृहद्देश्यामेव श्रुतिस्वरसम्बन्धविषये विचारविस्तारो दृश्यते यस्य उल्लेखः अस्मिन् पत्रे नाभूत्। स विषयस्तु विलक्षणतया दार्शनिकः, तथा च अर्वाचीने अपि चिन्तनीयः। तस्मात् तस्यापि विशेषोल्लेखप्रसङ्गो वर्तते। किञ्च, मत्तकोकिलायां मतङ्गमुनेः निदर्शनानुसारिकप्रयोगस्यापि साक्षात्करणे अस्ति भाविसम्भावना। तदाधारेण सुस्पष्टतया तत्त्वप्रयोगसामञ्जस्ये सति प्राप्तश्रावणप्रत्यक्षाणां श्रुतीनां ध्वनिपरिमापपुरःसरो गाणिततत्त्वबोधोऽपि फलवान् स्यात्। वस्तुतः गुरुत्वाकर्षणस्य अभावे तदप्रत्यक्षीकृतमानवानां च स्थितौ प्राचीनविज्ञानपत्रादिज्ञानेन गणितादिचेष्टां कृत्वा गुरुत्वाकर्षणबोधो यथा अमूलो भवति, तथैव प्राचीनश्रुतिनिर्णयव्यवस्थायाः लोपे द्वाविंशतिश्रुतिसाधनतत्पराणां गाणितचेष्टा। वस्तुतः निसर्गे स्थितस्य विषयस्य न्यायपरम्पराज्ञानेन रहस्योन्मोचनं जागतिकप्रज्ञाकार्यम् इति विषयज्ञानस्य मूलभावः। तस्माद् व्युत्क्रमेण कृत्रिमरूपेण द्वाविंशतिश्रुतिबोधो न क्वचिद् भरतादीनां सिद्धान्तपोषकत्वेन भवितुमर्हति। यद्वास्तु, अनेन प्रबन्धेन ये मुख्यांशाः निर्णीताः तत्र संवादस्यैव श्रुतिस्वरव्यवस्थायां मूलत्वम् इति नितान्तमुख्यांशः। संवाद एव सङ्गीतध्वनीनां जीवातुः इति दृढा प्रतिपत्तिः। विना संवादज्ञानं सङ्गीतावबोध एव प्राचीने गान्धर्वरीतौ नाभवदिति शम्।

## परिशीलितग्रन्थसूची

1. *Nāṭyaśāstram abhinavabhāratīsametam* [Nāṭyaśāstra of Bharatamuni with the commentary Abhinavabhāratī by Abhinavaguptācārya] (Vol. 4); M. R. Kavi, J. S. Pade, V. M. Kulkarni, & T. S. Nandi (Editors); Oriental Institute; 2006.

2. *Śrīmallakṣyasaṅgīta*; V. N. Bhatkhande; Nirṇaya Sāgara Press; 1910.
3. *How the Ancient Indian Vīṇā Travelled to Other Asian Countries: A Reconstruction through Scriptures, Sculptures, Paintings and Living Traditions. National Security*; P. Bhattacharya and S. Chowdhury (Editors); 2021. <https:..www.vifindia.org.sites.default.files.national-security-vol-4-issue-1-article-pbhattachary&schowdhury.pdf>.
4. *The parts of a Vīnā*; A. Coomaraswamy; Journal of the American Oriental Society, 50, 244–253. 1930. <https:..doi.org.10.2307.593078>.
5. *Bṛhaddeśī* [Bṛhaddeśī of Śrī Mataṅga Muni] (Vol. 1); Mataṅga; P. L. Sharma (Editor & Translator); Indira Gandhi National Centre for the Arts; Motilal Banarasidass Publishers Pvt. Ltd.; 1992.
6. *Saṅgītaratnākara* [Saṅgīta Ratnākara of Śārṅgadeva] (Vol. 1); Śārṅgadeva; R. K. Shringy (Translator); Motilal Banarasidass; 1978 (1st Edition).
7. *Caturdaṇḍiprakāśikā* [Caturdaṇḍiprakāśikā of Veṅkaṭamakhin] (Vol. 1); Veṅkaṭamakhin. R. Sathyanarayana (Editor & Translator); Indira Gandhi National Centre for the Arts; Motilal Banarasidass Publishers Pvt. Ltd.; 2002.
8. *The Doctrine of Shruti in Indian Music*; V. Vidwans; FLAME University; 2016. <https:..www.indian-heritage.org.music.TheDoctrineofShrutiInIndianMusic-Dr.VinodVidwans.pdf>


✶ ✶ ✶